श्रीचन्द्रप्रभसूरिविरचित

# प्रमेयरत्नकोशः ।

पी. एच्. डी. इत्युपाधिधारिणा एल्. स्वालीसंज्ञेन

युरोपखंडवासिना संशोधितः ।

भावनगरवास्तव्य झवेरभाई भाईचंदस्य

द्रव्यसाहाय्येन

मुद्रयित्वा प्रसिद्धिविधात्री

श्रीजैनधर्मप्रसारकसभा भावनगर.

वीरसंवत्सरः २४३८ विक्रमसंवत्सरः १९६८

मुंबई—निर्णयसागरयन्त्रालये मुद्रितः.

Shrî-Chandraprabhasuri's

# PRAMEYA-RATNA-KOSHA.

EDITED BY

LUIGI SUALI, PH. D.

PUBLISHED BY

THE JAINA-DHARMA-PRASARAK-SABHA,

BHAVNAGAR.

BY THE PECUNIARY ASSISTANCE OF

SHAH JAVERBHAI BHAICHAND

OF

BHAVNAGAR.

Vîr Samvat 2438.—1912 A. D.

*All rights reserved.*

Published by Kunverji Anandji for the Jain-Dharma-Prasarak-Sabha, Bhavnagar.

Printed by B. R. Ghanekar at the "Nirnaya-sagar Press," 23, Kolbhat Lane, Bombay.

# PREFACE.

The present edition of चन्द्रप्रभ's प्रमेयरत्नकोश is chiefly based on the two following MSS.

A—22 f. x 17 l. x 56 akṣaras, dated Samvat 1960;

B—24 f. x 17 l. x 54 akṣaras, dated Samvat 1954.

Both these MSS. are modern copies of older MSS. and I have obtained them from private libraries in India through Professor Dr. Jacobi, to whose kindness I am indebted if I was enabled to undertake the edition of the work. Indeed, as it seems, the MSS. of the प्रमेयरत्नकोश are very rare in India and the work itself, though quoted in the philosophical Jaina literature and enjoying a great consideration, has not been edited till to-day and has been nearly unknown to the modern Jainas. For instance, it is not quoted by H. L. Jhaverī in his *First principles of the Jain philosophy*, London 1910 ( a treatise on the fundamental tenets of Jainism ), though some chapters of the प्रमेयरत्नकोश bear a direct relation to subjects which have been dealt with in the book of H. L. Jhaverī ( see chapt. II-IV on the सप्तभङ्गी ).

While the text was in the press, I received a transcript ( C ) of a MS. prepared for the Jain Dharma Prasāraka Sabhā. So far as I can judge comparing this transcript with the two above mentioned copies A and B, I find that C agrees almost entirely with B, so that I come to the conclusion that both the MSS. of which B and C are the copies, derive very probably from the same original. We have therefore two different manuscript traditions, represented one by A and the other by B and C; but the differences between them are not of such a nature, as to make it difficult to establish with certainty the form of the text.

The प्रमेयरत्नकोश is mentioned by गुणरत्न at the end of the chapter on जैनमत in his षड्दर्शनसमुच्चयटीका ( p. 265 of my edition in the *Bibliotheca Indica* ), as a तर्कग्रन्थ of the Cvetāmbara Jainas. The book therefore must have enjoyed much reputation even at the time of गुणरत्न, since this author

in the short bibliographical review with which he ends each chapter of his work, mentions only the most important texts of the various philosophical schools.

The प्रमेयरत्नकोश is attributed to चन्द्रप्रभ, in the second of the opening verses and at the end of the text. This is the only explicit hint, but such that we may safely trust it. I cannot therefore accept the words of S. C. Vidyābhūshaṇa ( *Medioev. Logic*, p. 46 ), " He was the author.........*possibly* also of the two logical treatises called the Prameyaratna koça and Nyāyāvatāra-vivṛti." Regarding the life of चन्द्रप्रभ, the chief item is that given by धर्मसागर and quoted by Bhandarkar, *Report 1883-84*, p. 147. " In Râjasrî's Karṇavâraka there were four fellow-pupils, viz Chandraprabha, Munichandra, Mânadeva and Sânti. In Samvat 1149 Sridhara, a Jaina, wishing to set up at great expense an idol of Jinendra, asked Chandraprabha the elder to direct Munichandra the younger who was well known to all to take part in the religious ceremonies. Chandraprapbha being jealous said that a Sādhu could not take part in the proceedings; laymen only could do so. This ruling about Srâvakapratishthâ was disregarded and failed to draw any followers. So in Samvat 1159 Chandraprabha on one occasion said he had a vision of Pâdmâvatî the previous night and she had directed him to prove to his followers the truth of the srâvakapratishṭhâ and the Pûrṇimâpâkshika ( the observation of the Pâkshika, literally, on the full moon-day but actually on the last days of both the halves of a month ) and their existence from time immemorial. Thus arose the Paurnamîyapâkshikas." We can therefore lay down with certainty the date as Samvat 1159 or 1102 A. D., so that we are entitled, without fear of mistake, to place the life of our author between the end of the 11th century and the beginning of the 12th. This is what we know for certain. He was born according to S. C. Vidyâbhûshaṇa ( p. 45 ) in Guzerat. Bhandarkar says ( p. 148 ) that " Tilakâchârya the author of a Pratishṭhâkalpa was a follower of Chandraprabha's sect ", and that " the Pâkshikasaptati was written by Munichandra for the edification of Chandraprabha ". Professor Peterson, *Report 1886-92* p. XXVII, adds that he was "pupil of Jayasimhasûri

and guru of Dharmagosha.........author of the Darsanas'uddhi." He must have been very famous, if we may entrust a verse of the दशवैकालिकटीका quoted in Peterson's 5th. Report and given by S. C. Vidyâbhûshaṇa (p. 46 note 3.) चन्द्रप्रभ, beside the प्रमेय°, wrote a work called दर्शनशुद्धि, a commentary on which was made by विमलगणि a pupil of धर्मघोष and therefore प्रशिष्य of चन्द्रप्रभ (see Peterson's *Report 1886–92* p. XXVIII, *Report 1882–83*, p. 41; Weber's *Verzeichn.* p. 843 n. 1). In R. S. Bhandarkar's *Catalgoue of MSS. in the Deccan College*, p. 325 (Collection A of 1882–83, No. 276), we see a दर्शनशुद्धिप्रकरण in prakrit. Another दर्शनशुद्धिप्रकरण was composed by हरिभद्र and a pupil of his made an abstract of it with the title प्रवचनसारोद्धारप्रकरण. Professor Weber (No. 1938) informs us of a commentary on this work written by सिद्धसेनसूरि, who gives his spiritual genealogy in this order: धनेश्वर, अजतसिंह, वर्धमान, देवचन्द्र, चन्द्रप्रभ, भद्रेश्वर, अजतसिंह, देवभद्र (Weber, p. 851). According to Weber, the commentary of सिद्धसेन was composed Samvat 1243 or 1186 A. D.: चन्द्रप्रभ therefore, who appears as the fourth in the spiritual genealogy of सिद्धसेन, must have been already advanced in years in 1102 A. D., when he founded the Pûrnimâgaccha. S. C. Vidyābhūshaṇa (*Medioev. logic* p. 46. note 2 and introduction to his edition of the न्यायावतार p. V.) attributes to चन्द्रप्रभ also the न्यायावतारविवृत्ति, but he is not very positive on this subject and aknowledges that the authorship of this work "must, however, for the present, remain an open question."

To conclude: no work which could with certainty be attributed to चन्द्रप्रभ had been published till to-day and therefore we may hope that the generality of scholars will give a friendly welcome to this edition of the प्रमेयरत्नकोश, which enables us to know an author of no small importance in the history of Jainism.

The प्रमेयरत्नकोश has not however a purely confessional or religious interest, but it is of a general philosophical importance. One could describe it as a series of monographs about the chief point which distinguish Jaina philosophy from the other Indian systems. The book therefore was to have a twofold character, expositive and polemic: the second

prevails on the first. Indeed after having refuted the theory of the existence of God and demonstrated the necessity of an omniscient being who must be the Jina, the author propounds and demonstrates the सप्तभङ्गी and the अनेकान्तवाद, which are the chief characteristics of Jaina philosophy. In the following chapters he discusses the most relevant points by which Jainism is distingueshed from the other philosophical systems of India and he finds, therefore, an opportunity for refuting Sâmkhya, Mīmâṇsaka, Bauddha, Naiyâyika and Vaiceshika. On this account the book is a remarkable contribution to the history of Indian philosophy and helps us to establish the exact standpoint taken by Jainism in regard to many general questions discussed by the various Indian schools. It is interesting also on account of the style which is of that analytic and dialectic, I should say scholastic, character which properly belongs to an advanced stage of philosophical evolution. The exposition is always clear and the method rigorously logical.

I have been able to read the proofs only once and the Jain Dharma Prasāraka Sabhâ have taken upon themselves to oversee and control the corrections. But some mistakes have remained, especially in what I shall call the exterior part, with which the editor has not meddled. I mean to say in the composition of the title page and head line. In these places the readers are requested to correct कोष ( which I did not write ) into कोश. It is true that the form with ष् is permitted (see Apte's Dictionary and Wackernagel's *Altindische Grammatik*, p. 225 ); but the form with श् is more correct and, in any way, it is in this form that the word appears in the title of the work as it is in the MSS.

PAVIA,
*June 1912.*

L. SUALI.

श्रीचन्द्रप्रभसूरिविरचित–

# श्रीप्रमेयरत्नकोषः

। ॐ ।

। नमः सर्वज्ञाय ।[1]

नत्वा ज्ञानतमिस्रसंततिहरं सज्ज्ञानभास्वच्छिखं
प्राज्यैश्वर्यसुतैलपूरकलितं निर्वाणपात्रे स्थितम् ।
दग्धानङ्गपतङ्गकं न च पुनर्विध्यातरूपं क्वचि–
द्दूरादुज्झितपापकज्जलभरं सर्वज्ञदीपं शुभम् ॥ १ ॥
प्रमेयरत्नकोशोऽयं क्रियते कृतिवल्लभैः[2] ।
हितार्थं धीदरिद्राणां श्रीचन्द्रप्रभसूरिभिः ॥ २ ॥
वादोदन्वत्तरीकल्पं येऽमुं लास्यन्ति सोद्यमाः ।
सुखिनस्ते भविष्यन्ति शासनस्य प्रभावकाः ॥ ३ ॥
श्रीसर्वज्ञप्रणीतत्वाच्छासनस्यास्य सत्यता ।
तत्सिद्धिपूर्विका तेन क्रियतेऽन्यविनिश्चितिः ॥ ४ ॥
परेषामप्रतिक्षेपे स्वमतस्य परिग्रहः ।
न शोभां तनुते तेन तत्प्रमेयनिरूपणम् ॥ ५ ॥
सर्वदर्शनवेत्तृत्वं जैनैः कार्यं विशेषतः ।
सर्वज्ञपुत्रकत्वेन ते प्रसिद्धा यतो जने ॥ ६ ॥

[ I ]

## [ अथ सर्वज्ञसिद्धिः ]

इह केचित्त्रिभुवनभवनोदरविवरवर्तिदेशकालस्वभावविप्रकृष्टेतरपदार्थसार्थावलोकनसमर्थकेवलालोकसंपदङ्गना-

---

1 B adds श्रीपार्श्वनाथाय नमः 2 marginal gloss of B पण्डितप्रियः

लिङ्गितपुरुषसत्त्वं प्रति विप्रतिपद्यन्ते । तत्संमोहापोहाय प्रमाणमारभ्यते । तद्यथा । ज्ञानस्य तारतम्यं क्वचिद्विश्रान्तं, तरतमशब्दवाच्यत्वात् । यद्यत्तरतमशब्दवाच्यं तत्तत्क्वचिद्विश्रान्तं, यथा परिमाणम् । तरतमशब्दवाच्यं च ज्ञानम् । तस्मात्क्वचिद्विश्रान्तमिति । न चायमसिद्धो हेतुः, एकेन्द्रियादीनां सकलश्रुतज्ञानरत्नरत्नाकरपारगतानां जीवानां ज्ञानस्य तारतम्येनोपलब्धेः । नापि विरुद्धत्वमाशङ्कनीयं, ज्ञानविकलसकलकुम्भादिभ्योऽत्यन्तं व्यावर्तमानत्वात् । नाप्यनैकान्तिकतोद्भावनीया, विपक्षतः सर्वथा व्यावृत्तत्वादेव । नापि कालात्ययापदिष्टत्वं साधनस्यास्य संभावनीयं, प्रत्यक्षादिप्रमाणाबाधितधर्मनिर्देशानन्तरं प्रयुक्तत्वात् । नापि प्रकरणसमोऽयं हेतुः, विपर्ययसाधकस्य प्रत्यनुमानस्याप्रवृत्तेः । ततो भवति सकलदोषरहितादतो हेतोर्ज्ञानप्रकर्षसिद्धिः । न च सर्वथोच्छेदः संभावयितव्यः, उपयोगस्वभावत्वाज्जीवस्य, "उपयोगलक्षणो जीवः" इतिवचनात् । न चैतद्वाच्यं "उपयोगस्वभावत्वे सर्वदैव प्रकृष्टज्ञानवान् जीवः प्राप्नोति, ज्ञानाद्यावारककर्मपटलतिरस्कृतत्वात्" । न हि तिरस्करणेन जलदमण्डलादिना तिरस्कृतस्य मार्तण्डमण्डलस्यैवैकरूपेण परिस्फूर्तिर्भवति । न च "कर्ममलीमसत्वाद्विशुद्धेरभावान्न ज्ञानप्रकर्षो भवति" इति वाच्यं, अनुमानतो विशुद्धिसद्भावसिद्धेः । तथाहि । तथाविधो विवक्षितः कश्चिज्जीवः संभवदत्यन्तविशुद्धिकः, अविशुद्धिप्रतिपक्षाविकलकारणकलापोपेतत्वात् । यो योऽविशुद्धिप्रतिपक्षाविकलकारणकलापोपेतः, स स संभवदत्यन्तविशुद्धिकः, यथा क्षारमृत्पुटपाकादिविशुद्धिकारणोपेतो जात्यो रत्नविशेषः । तथा च तथाविधो विवक्षितः कश्चिज्जीवः प्रकर्षप्राप्ततपश्चारित्रानास्रवध्यान-

योगनिरोधविशुद्धिकारणकलापोपेतः । तस्मात्संभवदत्यन्तविशुद्धिक इति ॥

तथाविधस्य कस्यचिद्भव्यजीवस्याष्टादशपापस्थानोपार्जितं ज्ञानाद्यावृत्तिरूपं कर्म प्रतिनियतविशिष्टवियोजकभावसामग्र्यामत्यन्तं वियुज्यते, आवृत्तिरूपत्वात् । यद्यदावृत्तिरूपं, तत्तदत्यन्तं वियुज्यते, यथा प्रतिनियतविशिष्टवियोजकभावसामग्रीसद्भावे काञ्चनोपलकाञ्चनस्य मलपटलम् । तथा चेदमष्टादशपापस्थानोपार्जितं ज्ञानाद्यावरणरूपं कर्म । तस्मादत्यन्तं वियुज्यते । न चेदमसिद्धत्वादिदूषणदुष्टं, निरवद्यत्वात् । अतः सकलकर्मवियुक्तो जीवो ज्ञानस्वरूपः सकलार्थग्रहणप्रवणः सर्वज्ञः ॥

किं च । सर्वे भावाः कस्यचित्प्रत्यक्षाः, प्रमेयत्वात् । यद्यत्प्रमेयं, तत्तत्कस्यचित्प्रत्यक्षं, यथा घटादि । प्रमेयं च लोकालोकस्वभावं वस्तु । तस्मात्कस्यचित्प्रत्यक्षम् । यस्य च प्रत्यक्षं, स सर्वज्ञ इति । तथा[1] संभवति कश्चित्सर्वार्थसाक्षात्कारी पुरुषः, अनुपदेशालिङ्गाविसंवादिविशिष्टदिग्देशकालप्रमाणाद्यात्मकचन्द्रादिग्रहणाद्युपदेशदायित्वात् । यो यो यद्विषयेऽनुपदेशालिङ्गाविसंवाद्युपदेशदायी, स स तत्साक्षात्कारी दृष्टः, यथास्मदादिः । स्वयमनुभूतेऽर्थेऽनुपदेशालिङ्गाविसंवादिविशिष्टदिग्देशकालप्रमाणाद्यात्मकचन्द्रादिग्रहणाद्युपदेशदायी च कश्चित् । तस्मात्तत्साक्षात्कारी च[2] । न चायमसिद्धो हेतुः, अनुपदेशालिङ्गाविसंवाद्युपदेशस्यास्मदादिष्वप्यविगानेन विद्यमानत्वात् । नाप्यनैकान्तिकः, तथाविधोपदेशदायित्वस्यासर्वार्थसाक्षात्कारिणः सर्वथानिवृत्तेः । नापि विरुद्धता, विपक्षतोऽत्यन्तं व्यावृत्तत्वादिति । न च तथाविधोपदेशस्य वृद्धपरंपरायातत्वादसिद्धं तत्साक्षात्कारित्वं, तेषां रागादिमत्त्वेन तथाविधो

1 A यथा 2 B C इति

पदेशदानाभावात् । न च "अनेन युक्तिकलापेन शिशिरकरशेखरसुगतकपिलानामपि सर्वज्ञतापत्तेः कथं वृषभवर्धमानादेः प्रतिनियतस्यैव सर्वज्ञत्वं भवति" इति वाच्यं, तदुक्ततत्त्वानां प्रमाणोपपत्तिभिर्बाध्यमानत्वात् । तथाहि । सदाशिवोऽभ्युपगम्यते नैयायिकैः, वैशेषिकैश्च महेश्वरः । तस्य च तत्त्वप्रणीतिरेव न घटते, विमुखत्वात्, वैमुख्यं च शरीररहितत्वात्, शरीररहितत्वं च धर्माधर्मविकलत्वात्, धर्माधर्मरहितत्वं च संसारिजीवविलक्षणत्वात् । तदुक्तम् ।

विमुखस्योपदेष्टृत्वं श्रद्धागम्यं परं यदि ।
वैमुख्यं वितनुत्वेन तच्च धर्माद्यभावतः ॥ १ ॥

किं च । महेश्वरेण षट् तत्त्वानि निरूपितानि द्रव्यादीनि । तत्र च नव द्रव्याणि पृथिव्यादीनि मनोन्तानि प्रतिपादितानि । तत्संख्या च व्यभिचरतीति तमश्छायादेरपि द्रव्यत्वेन घटमानत्वात् । तदुक्तम् ।

तमः खलु चलन्नीलं परापरविभागवत् ।
इतरद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ॥ १ ॥
आतपः कटुको रूक्षश्छाया मधुरशीतला ।
कषायमधुरा ज्योत्स्ना सर्वरोगहरं तमः ॥ २ ॥

इत्यादिवचनात् । दिक् च पुरुषविवक्षिताकाशप्रदेशव्यतिरेकेण न काचिदुपलभ्यते घटते वा विचार्यमाणा । अतस्तस्या अपि न सत्त्वम् । मनोऽप्यणुपरिमाणं नित्यं द्रव्यं न किंचन घटते । अतो व्यभिचार्यर्थाभिधायकत्वात्कथं तस्य[1] सर्वज्ञत्वम् । तन्मार्गानुसारिकणादादिमुनिप्रणीतशास्त्राणामपि न तत्त्वाभिधायकत्वम् । तदभावाच्च न शास्त्रत्वमिति । तथा सुगतस्यापीहपरलोकव्यवहारबाधितैकान्तक्षणिकत्वनैरात्म्यादिवादतत्त्वप्रतिपादकस्य कथं सर्व-

1 A omits

ज्ञत्वमुपपद्यते, बाध्यमानार्थाभिधायकत्वात्, उन्मत्तकवाक्यवदिति । तथा कपिलस्याप्यागोपालाङ्गनाप्रतीतव्यवहारबाधितैकान्ताक्षणिकप्रकृतिविकारसामान्यरूपसत्कार्याविर्भावतिरोभावादिरूपपदार्थप्रतिपादकस्य कथं सर्वज्ञत्वं जाघटीति । ततश्च सामर्थ्याद्वृषभवर्धमानादय एव सर्वज्ञाः, युक्तिप्रमाणोपपत्तिव्यवहारघटमानयथावस्थितार्थाभिधायकत्वात् । एवं च प्रमाणबलेन सर्वज्ञसत्तायां साधितायां सर्वज्ञप्रणीतत्वेन चागमस्य प्रामाण्ये सिद्धे पूर्वमुपवर्णितस्वरूपश्चतुर्विधो ऽप्यनुयोगः प्रज्ञागुणभूरिभिः सूरिभिर्विधीयमान आस्तिघ्नुते सिद्धिमिति ॥ सर्वज्ञसिद्धिप्रकरणं समाप्तमिति ॥ १ ॥

[ II. ]

## [ अथ सप्तभङ्गी ]

वयं खलु जैनेन्द्राः "एकं वस्तु[1] सप्रतिपक्षानेकधर्मरूपाधिकरणं" इत्याचक्ष्महे, प्रतिपर्यायं सप्तभङ्गीसंभवोपपत्तेः । अत्राह । केयं सप्तभङ्गीत्यत्रोच्यते । प्रश्नवशादेकस्मिन्वस्तुन्यविरोधेन विधिप्रतिषेधजल्पना सप्तभङ्गीति । एकस्मिन्वस्तुनि प्रश्नवशाद्दृष्टेनेष्टेन प्रमाणाविरुद्धा विधिप्रतिषेधकल्पना सप्तभङ्गी विज्ञेया । तद्यथा । घटमुदाहरणं कृत्वा ब्रूमहे। स्याद्घटः १ स्यादघटः २ स्याद्घटश्चाघटश्च ३ स्यादवक्तव्यो घटः ४ स्याद्घटश्चावक्तव्यश्च ५ स्यादघटश्चावक्तव्यश्च ६ स्याद्घटश्चाघटश्चावक्तव्यश्चेति[2] ७ । अर्पितानर्पितनयसिद्धिर्निरूपयितव्या । तत्र स्वात्मना स्याद्घटः, परात्मना स्यादघटः । को वा घटस्य स्वात्मा को वा परात्मेति । घटबुद्ध्यभिधानानुप्रवृत्तिलिङ्गः स्वात्मा । यत्र तयोरननुप्रवृत्तिः,

---

1 A एकवस्तु 2 A स्याद्घटश्च स्यादघटश्चावक्त°

स परात्मा, पटादिः । स्वपरात्मोपादानापोहनव्यवस्थाप्यं हि वस्तुनो वस्तुत्वम् । यदि स्वात्मोपादानपरिणतौ पटाद्यात्मव्यावृत्तिर्न स्यात्, सर्वात्मना घट[1] इति व्यपदिश्यते । अथ परात्मव्यावृत्तौ स्वात्मोपादानपरिणतिर्न स्यात्, खरविषाणादिवदवस्त्वेव स्यात् । अथवा नामस्थापनाद्रव्यभावेषु यो विवक्षितः, स स्वात्मा, इतरः परात्मा । अत्र विवक्षितात्मना घटो नेतरात्मना । यदीतरात्मनापि घटः स्यात्, विवक्षितात्मना वाघटो नामादिव्यवहारोच्छेदः स्यात् । अथवा विवक्षितशब्दवाच्यसादृश्यसामान्यसंबन्धिषु कस्मिंश्चिद्घटविशेषे परिगृहीते प्रतिनियतो यः संस्थानादिः स स्वात्मा, इतरः परात्मा । तत्र प्रतिनियतेन घटो नेतरेण । यदीतरात्मकः स्यात्, एकघटमात्रप्रसङ्गः । ततः सामान्याश्रयो व्यवहारोऽपि न स्यात् । अथवा तस्मिन्नेव घटविशेषे कालान्तरावस्थायिनि पूर्वोत्तरकुसूलान्तकपालाद्यवस्थाकलापः परात्मा, तदन्तरालवर्ती[2] पर्यायः स्वात्मा । स तेनैव घटस्तत्कृतकर्मगुणव्यपदेशदर्शनान्नेतरात्मना । यदि कुसूलान्तकपालाद्यात्मकेनापि घटः स्यात्, घटावस्थायामपि तदुपलब्धिर्भवेत्, उत्पत्तिविनाशार्थपुरुषप्रयत्नफलाभावश्चानुषज्येत । अथान्तरालकालवर्तिपर्यायात्मनाप्यघटः स्यात्; घटकृत्यं फलं नोपलभ्येत । अथवा प्रतिक्षणं द्रव्यस्य परिणामोपचयापचयभेदादर्थान्तरोपपत्तेश्च ऋजुसूत्रनयापेक्षया प्रत्युत्पन्नघटस्वभावः[3] स्वात्मा । घटपर्याय एवातीतानागतः परात्मा । अनेन प्रत्युत्पन्नस्वभावेन सता घटो नेतरेणासता, तथोपलब्ध्यनुपलब्धिसद्भावात् । इतरथा हि प्रत्युत्पन्नवदतीतानागतात्मनापि घटत्व एकसमयमात्रमेव सर्वं स्यात् । अतीतानागतवत्प्रत्युत्पन्नाभावे घटाश्रयव्यवहाराभाव आपद्येत, विनष्टानुत्पन्नघटव्यवहा-

1 A पट 2 B C °वर्ति° 3 B C स्वभाव°

राभावात् । अथ तस्मिन्प्रत्युत्पन्नविषये रूपादिसमुदाये परस्पराकारानुवर्तिनि पृथुबुध्नाद्याकारः स्वात्मा, इतरः परात्मा। तेन पृथुबुध्नाद्याकारेण घटोऽस्ति, नेतरेण, घटव्यवहारस्य तद्भावे भावात, तदभावे चाभावात् । यदि हि पृथुबुध्नाद्यात्मनापि घटो न स्यात्, सर्वत्रैव स न स्यात् । अथेतरात्मनापि घटः स्यात्, तदाकारशून्येऽपि घटव्यवहारः प्राप्नुयात् । अथवा रूपादिसंनिवेशविषयसंस्थानो घटः, तत्र चक्षुषा घटो गृह्येत । एतस्मिन्व्यवहारे रूपमुखेन घटो गृह्यत इति रूपं स्वात्मा, रसादिः परात्मा । स घटो रूपेणास्ति, नेतरेण रसादिना, प्रतिनियतकरणग्राह्यत्वात् । अन्यथा चक्षुषायं घटो गृह्यत इति रसादिरपि घट इति गृह्येत सर्वेषां रूपस्वरूपत्वप्रसङ्गः । ततः कारणान्तरकल्पनानर्थिका। यदि वा रसादिवद्रूपमपि घट इति न गृह्यते, चक्षुर्विषयतास्य न स्यात् । अथवा शब्दभेदे ध्रुवोऽर्थभेदो भवतीति घटकुटादिशब्दानामप्यर्थभेदः, घटनाद्धटः, कौटिल्यात्कुट इति तत्क्रियापरिणतिक्षण एव तस्य शब्दस्य प्रवृत्तिर्युक्ता । तत्र घटनक्रियाविषयः कर्तृभावः स्वात्मा, इतरः परात्मा । तत्राद्येन घटो[1] नेतरेण, तथार्थसमभिरोहणात् । यदि च घटनक्रियापरिणतिमुखेनाप्यघटः स्यात्, तद्व्यवहारनिवृत्तिः स्यात्। यदि चेतरव्यपेक्षयापि घटः स्यात्, पटादिष्वपि तत्क्रियाविरहितेषु तच्छब्दप्रवृत्तिः स्यात्, एकशब्दवाच्यता वा वस्तुनः स्यात्। अथवा घटशब्दप्रयोगानन्तरमुत्पद्यमान उपयोगाकारः स्वात्मा, आदेयत्वादन्तरङ्गत्वाच्च; बाह्यो घटाकारः परात्मा, तदभावेऽपि घटव्यवहारदर्शनात्। स घट उपयोगाकारेणास्ति, नान्येन। यदि ह्युपयोगाकारात्मनाप्यघटः स्यात्, वक्तृश्रोतृहेतुफलभूतोपयोगघटाकाराभावात्तदधीनो व्यापारो विनाशमुपेयात् । इत-

1 B C घटौ

रोऽसंनिहितोऽपि यदि घटः स्यात्, पटादीनामपि स्याद्घटत्वप्रसङ्गः । अथवा चैतन्यशक्तेर्द्वावाकारौ । ज्ञानाकारो ज्ञेयाकारश्च । अनुपयुक्तप्रतिबिम्बाकारपरिणतादर्शतलवज्ज्ञानाकारः, उपयुक्तप्रतिबिम्बाकारपरिणतादर्शतलवज्ज्ञेयाकारः । तत्र ज्ञेयाकारः स्वात्मा तन्मूलत्वाद्घटव्यवहारस्य, ज्ञानाकारः परात्मा, सर्वसाधारणत्वात् । स घटो ज्ञेयाकारेणास्ति, नान्यथा । यदि ज्ञेयाकारेणाप्यघटः स्यात्, तदाश्रये कर्तव्यतानिरासः स्यात् । अथ ज्ञानाकारेणापि घटः स्यात्, पटादिविषये ज्ञानाकारकालेऽपि तत्संनिधानाद्घटव्यवहारवृत्तिः प्रसज्येत । उक्तैः प्रकारैरर्पितं[1] घटत्वं चाघटत्वं च परस्परतो न भिन्नम् । यदि भिद्येत सामानाधिकरण्यं तद्बुद्ध्यभिधानानुप्रवृत्तिर्न स्यात्, घटे पटवत् । ततश्चेतरेतरविनाभाव उभयोरप्यभावात्तदाश्रयव्यवहारापह्नवः कृतः स्यात् । अतस्तदुभयात्मकोऽसौ क्रमेण तच्छब्दवाच्यतामास्कन्दन्स्याद्घटश्चाघटश्चेत्युच्यते । यदि तदुभयात्मकं वस्तु घट एवेत्युच्यते, इतरात्मासंग्रहादतत्त्वमेव स्यात् । अथाघट एवेत्युच्यते । घटात्मनानुपादानादनृतमेव स्यान्न वस्तुता तावदेवेति । न चान्यः शब्दस्तदुभयात्मावस्थातत्त्वाभिधायी विद्यते । असौ घटवचनगोचरातीतत्वात्स्यादवक्तव्यो घट इत्युच्यते । घटात्मार्पणमुखेनोक्तावक्तव्यस्वरूपनिरूपणेन चापदिश्यमानः स एवार्थ इति स्याद्घटश्चावक्तव्यश्चेति । निरूपिताघटभङ्गासङ्गे प्रदर्शितावक्तव्यधर्मेण चापदिश्यमानः स एवार्थ इति स्यादघटश्चावक्तव्यश्च । तदुभयाभिधानक्रमार्पणप्रदर्शितावक्तव्यधर्मवशाविर्भूततद्व्यपदेशः स एवार्थः स्याद्घटश्चाघटश्चावक्तव्यश्च भवतीत्येवं सप्तभङ्गी सर्ववस्तुन्यवतरति ॥२॥

1 B प्रकारैरपि तत

[ III ]

## [ अथोत्पादव्ययध्रौव्यात्मकं वस्तु ]

उत्पादस्थितिभङ्गवत्पदार्थसंसिद्ध्यर्थमिदं प्रकरणमारभ्यते । वस्तु नामोत्पादव्ययात्मकं वा स्यात्, ध्रौव्यात्मकं वा स्यात्, उत्पादव्ययध्रौव्यात्मकं वा स्यादिति विकल्पत्रयमवतरति। यद्युत्पादव्ययात्मकं, तत्रापि किं सर्वथोत्पादोऽथ कथंचिदिति पक्षद्वयं भाव्यते[1] । यदि सर्वथोत्पादः, यथा घटपर्यायस्योत्पादस्तथा प्रतीयमानस्यापि मृद्द्रव्यस्योत्पादः समापनीपद्यते । अत उत्पादोऽपि प्रागसत इदानीमात्मलाभस्ततश्चोत्पाद्यत इति कोऽर्थः । इदानीमात्मानं प्रतिलभते न प्रागित्ययमर्थः । एवं च सति यथोत्पद्यमानत्वान्मृत्पिण्डकारणे घटस्य[2] प्रतीतिर्नास्ति, एवं मृद्द्रव्यस्यापि प्रतीतिर्न स्यात् । प्रतीयते च मृद्द्रव्यम् । ततो निश्चिनुमो वयं " केनचिद्रूपेणोत्पादः " इति । येन रूपेणोत्पादः, न तद्रूपं ध्रौव्यं भवति । तदपि मृद्द्रव्यम् । न चोत्पद्यमाने घटे मृद्द्रव्यमुत्पद्यमानं सर्वात्मना प्रतीयते, न च कुम्भकारः "चक्रदण्डमृत्पिण्डादिना हेतुकलापेन मृत्पिण्डमुत्पादयामि" इति चेष्टते, किं तु घटोत्पत्त्यर्थमेवासौ प्रयासं करोतीति । ततः कथंचिदुत्पादपर्यायरूपेणोत्पादः, न द्रव्यरूपेण । तथा विनाशोऽपि कथंचिदेव । यदि च सर्वथा विनाशो भवेत्, यथा घटस्य विनाशः, तथा मृद्द्रव्यस्यापि विनाशः समुपजातः । तथा च यथा नष्टत्वात्कपालेषु घटप्रतीतिर्नास्ति, एवं मृद्द्रव्यस्यापि प्रतीतिर्न स्यात् । प्रतीयते च मृद्द्रव्यम् । ततोऽध्यवस्यामः "केनचिद्रूपेण विनाशः" इति । येन रूपेण विनाशः, न तद्ध्रौव्यमिति । तदपि च मृद्द्रव्यम् । न च मृत्पिण्डविनाशान्मृद्द्रव्यस्यापि विनाश इति । न च

---

1 A संभाव्यते 2 A °कारणघटस्य

प्रेक्षापूर्वकारी मुसलमुद्गरादिना मृद्द्रव्यविनाशार्थं प्रवर्तते, किं तु घटद्रव्यपदार्थस्योत्पादविनाशार्थमिति[1] । ततः कथंचिद्विनाशः पर्यायरूपेण विनाशः, न द्रव्यरूपेण । तथा न च ध्रौव्यात्मकमेव तत्त्वं, यतो न मृत्पिण्डघटकपालनाशोत्पत्तिव्यतिरेकेण मृद्द्रव्यं नाम समुपलभ्यत इति मृत्पिण्डापेक्षया विनाशः, घटापेक्षयोत्पादः, मृद्द्रव्यापेक्षया ध्रौव्यमित्युत्पादविगमध्रौव्यात्मकं वस्तु तत्त्वमिति । अत्राप्युत्पाद एव विनाशो विनाश एवोत्पाद उत्पादविनाशावेव ध्रौव्यं ध्रौव्यमेवोत्पादविनाशौ । तथा।[2] उत्पाद उत्पाद एव न विनाशः, विनाशोऽपि विनाश एव नोत्पादः, उत्पादविनाशावप्युत्पादविनाशावेव न ध्रौव्यं, ध्रौव्यमपि ध्रौव्यमेव नोत्पादविनाशावपीत्यत्रापि स्याद्वादः । न च घटोत्पादातिरेकेण मृत्पिण्डविनाश इत्युत्पाद एव विनाशः । तथा मृत्पिण्डविनाशव्यतिरेकेण न घटोत्पाद इति विनाश एवोत्पादः । न च मृत्पिण्डविनाशोत्पादातिरेकिरूपाभिमतानुगतैकाकाररूपतया विज्ञानाभिधानव्यापारावसीयमानापरापरभेदभिन्नमृत्पिण्डं सदादिसामान्यं प्रतीमः । तस्मादुत्पादविनाशावेव ध्रौव्यं, ध्रौव्यमेवोत्पादविनाशौ, यस्मात्पूर्वाकारं परित्यजदुत्तरमेव घटाकारं गृह्णदात्मीयमप्याकारमत्यजत्तदेव मृद्द्रव्यमुत्पद्यते विनश्यति तिष्ठति चेति । ननु पूर्वापरविरुद्धमेवेदमाभासते । यद्युत्पादविनाशौ कथं ध्रौव्यं, ध्रौव्यं चेत्कथमुत्पादविनाशाविति परस्परविरुद्धत्वात्कथमुत्पादविनाशावेव ध्रौव्यमिति चेत् । नन्वेतदज्ञानमहीधरभाराक्रान्तबुद्धिविजृम्भितं, अनेकान्तवा-

---

55 1 B घटविनाशार्थमिति 2 B omits उत्पाद उत्पाद एव न विनाशः

दाभ्युपगमात् । वयं खलु जैनेन्द्रा आक्षिप्तप्रतिपक्षानैकान्तधर्मस्वरूपनिरूपणात्स्याद्वादिन इति ॥

सामान्यं स्याद्भिन्नं स्यादभिन्नं स्याद्विकारि स्यादविकारि । विशेषा अपि स्याद्विकारिणोऽविकारिणश्चेत्यत्रापि सप्तभङ्गी न निवर्तते, अन्योन्यात्मकत्वात्सामान्यविशेषयोरिति । न च तावत्प्रतीयमानयोः सामान्यविशेषयोरपलापः शक्यते कर्तुं, अनुभवलोकानुगमादिप्रमाणाविरुद्धत्वात् । तदपि च सामान्यं विशेषेभ्यो व्यतिरिक्तं स्यात्, अव्यतिरिक्तं वेति विकल्पद्वयं संभाव्यते । न तावदाद्यः पक्षो विदुषां मनांसि प्रीणयतीति द्वितीयः पक्षः समाश्रीयते । अतो विकारिभ्यो विशेषेभ्योऽभिन्नस्वभावत्वात्सामान्यमपि कथंचिद्विकार्येव, अन्यथा सामान्यानुपपत्तेर्विशेषानुपपत्तिरपि स्यात् । प्रतीयते च विशेषोपपत्तिः । अतः सामान्यस्य परोपाधिको विशेषो विकारः, स्वोपाधिकस्त्वविकार इति स्यात्सामान्यं विकारीति सिद्धो नः सिद्धान्तः । तथा सामान्यादव्यतिरेकेण[2] विशेषाः समुपलभ्यन्ते, अन्यथा वस्तुस्वभावाभावप्रसङ्गात् । तदव्यतिरिक्तत्वात्सामान्यवद्विशेषाणां चाविकारित्वं, अन्यथाभेदप्रसङ्गः स्यादिति विशेषाणामप्यविकारः परोपाधिकः, विकारस्तु स्वोपाधिक इति स्यादविकारिणो विशेषा विकारिणश्चेति न कश्चिद्दोषः । तस्माद्ध्रौव्यमेवोत्पादविनाशौ । तथा न च घटोत्पाद एव घटाभावः, सकललोकप्रसिद्धजलाद्यानयनाद्यर्थक्रियाव्युपरतेः । अत उत्पाद एवोत्पादः, न विनाश इति[3] । तथा घटोत्पादो हि[4] मृत्पिण्डचक्रचीवरादिसंयोगहेतुकः, विनाशस्तु मुसलमुद्गरादिहेतुसंपातोपनीतकर्मजनितसं-

1 A अक्षिप्तप्रतिपक्षनै° 2 A सामान्याव्यति° 3 A reads अत उत्पाद एव विनाश इति 4 the words हि ...... विनाशस्तु are omitted in A; in B they are a marginal addition

योगप्रत्यनीकविभागहेतुकः । कार्यद्रव्यमपि ध्रौव्यमेव नोत्पादविनाशौ, परस्परविशीर्यमाणावयवकलापादिकार्यानुपलम्भात् । विनाशोऽपि विनाश एव । न विनाश एवोत्पादः, उत्पादविनाशावप्युत्पादविनाशावेव न ध्रौव्यं, ध्रौव्यमपि ध्रौव्यमेव नोत्पादविनाशौ, परस्परविभिन्नस्वभावत्वात् । उत्पादो नाम सत्त्वं, विनाशस्तु तद्विपरीतो भावः । पूर्वोत्तरकालभाविषु[1] पर्यायेष्वनुगतात्मकं द्रव्यमित्युत्पादव्ययध्रौव्यात्मकं वस्तु सिद्धमिति ॥ ३ ॥

[ IV ]

## [ अथ सप्तभङ्गीस्थापनम् ॥ ]

एकान्तवादिमातङ्गभञ्जने गन्धहस्तिनम् ।
गन्धहस्तिनमानम्य सप्तभङ्गी विचार्यते ॥ १ ॥

इह हि लोकालोकोदरविवरवर्तियथावस्थितपदार्थसार्थप्रतिपादनप्रवीणं "स्यात्पदार्थलाञ्छितः सन् घटः" इत्यादि वाक्यप्रयोगं प्रति विप्रतिपद्यन्ते । यदुत " सन् घटः " इत्यादि वाक्यकलापादेव विवक्षितार्थसिद्धेः किमनेनाजागलाग्रावलम्बितस्तनयुगायमानेन स्यात्पदादिप्रयोगेणेति । तत्र " सन् घटः " इति वाक्यमुदाहरणीकृत्य सर्ववाक्यसाधारणं प्रतिविधानमभिधीयते । यदुक्तं " सन् घटः " इति, तत्किमिदं निरवधारणं[2] वा, सावधारणं वा; सावधारणमपि किं साक्षात्प्रयुज्यमानावधारणं, अन्तर्भूतावधारणं वा; अन्तर्भूतावधारणमपि किमेकपदावधारणमिदं वाक्यं, पदद्वयावधारणं वेति विकल्पाः । तत्र यदि निरवधारणमिदं वाक्यं, तदा " सन् घटः " इत्युक्त अपेक्षया सन्नपि न भवति, निरवधारणत्वादेव । यथा श्रीफलमपेक्षया महत्तथापेक्षयामहदपि, द्विरूपत्वात्तस्य । एवं च सिद्धसाध्य-

1 A पूर्वोत्तरकालभावेषु 2 B inserts वाक्यं

ता । स्वरूपसत्त्वस्य पररूपासत्त्वस्य चाङ्गीकृतत्वात् । अत्र प्रयोगः । " सन् घटः " इति वाक्यं विवक्षया साध्यविपक्षमपि प्रतिपादयति निरवधारणत्वात् । यद्यन्निरवधारणं तत्तत्साध्यविपक्षमपि प्रतिपादयति, यथा "बृहच्छ्रीफलं " इति वाक्यमपेक्षया बृहदपि । निरवधारणं चेदम् । तस्मात्साध्यविपक्षप्रतिपादकमपीति । ततः कथं " सन् घटः " इत्यादिवाक्यादैकान्तिकसत्त्वमिति प्रतिपत्तिरिति । अथ सावधारणं प्रयुज्यते । तत्किं साक्षात्प्रयुज्यमानावधारणं, यद्वान्तर्भूतावधारणम् । न तावत्साक्षात्प्रयुज्यमानावधारणं, अवधारणपदस्याश्रवणात् । अथान्तर्भूतावधारणं; तत्किं " सन्नेव घटः " इत्यवधार्यते, " घट एव सन् " इति वा " सन्नेव घट एव" इति वा । तत्र न तावदाद्यो विकल्पः, घटमानको घटस्य सर्वप्रकारैः सत्त्वस्य प्रोच्यमानत्वात् सर्ववस्तुस्वरूपसंकीर्णतापत्तिर्नास्तित्वनिरवकाशशब्देनाभिधीयमानत्वात् । अनिष्टं चैतत् । प्रतिनियत एव सन्निति । अथ द्वितीयो विकल्पः; तर्हि यः कश्चनापि[1] सन्स घट एव प्राप्नोति, नापरं वस्तु, वस्त्वन्तरस्यावधारणेन व्यवच्छिद्यमानत्वात् । अथ तृतीयो विकल्पोऽभ्युपगम्यते; तर्हि पक्षयुगलोक्तं दूषणं युगपदापद्येत । यदुक्तम् ।

प्रत्येकं यो भवेद्दोषो द्वयोर्भावे कथं न सः ।

अत्र प्रयोगः । " सन्नेव घटः " इति वाक्यं विवक्षितार्थप्रतिपादकं न भवति, निरर्थकत्वात् । यद्यन्निरर्थकं तत्तद्विवक्षितार्थप्रतिपादकं न भवति, यथा शुकशुकाशब्दः । तथा चेदम् । तस्मान्न विवक्षितार्थाभिधायकमिति । एवं विकल्पद्वयेऽपि स्वमत्याभ्यूह्यानुमानं वक्तव्यम् । अथैवमुच्यते "अनेकधर्मपरिकरितं वस्तु कथं सिध्यति " इति । सद्भावावेदकप्रमाणाभावादिति चेत् । न, प्रत्यक्षेणानेकधर्म-

1 B C कश्चनादि

परिकरितस्य सर्वस्य वस्तुनो वीक्ष्यमाणत्वात् । अनुमानं च प्रमाणमुच्यते । यद्यथा प्रतिभासतेऽबाध्यमाने ज्ञाने तत्तथैवाभ्युपगन्तव्यं, यथा नीलं नीलरूपतया स्वपरद्रव्यक्षेत्रकालभावापेक्षया । सदसदाद्यनेकधर्मपरिकरितं च प्रतिभासतेऽबाध्यमाने ज्ञाने सर्वमेव वस्तुजातम्[1] । तस्मात्तथैवाभ्युपगन्तव्यमिति । न चात्रासिद्धतादिदूषणमुद्भावनीयम् । असिद्धत्वं हि हेतोः सर्वथा-सत्त्वप्रतिभासनेन वा स्यात्, असत्त्वप्रतिभासनेन वा स्यात्, उभयाभावप्रतिभासनेन वा । न तावदाद्यः पक्षः कक्षीकरणीयः । सर्वथा-सत्त्वप्रतिभासनेन सकलवस्तुस्वरूपसंकीर्णघटादिपदार्थप्रतिभासः स्यात् । न चैतद्दृष्टमिष्टं वा । अथ सर्वथा-सत्त्वप्रतिभासनेनासिद्धत्वं साधनस्योच्यते; तर्हि स्वरूपस्यापि सत्त्वाभावः प्राप्नोति, सर्वथाभावस्वरूपेणाभ्युपगमात् । अथ तृतीयविकल्पाङ्गीकरणे नासिद्धत्वं हेतोः प्रोच्यते; तर्ह्येकप्रतिषेधस्यापरविधिनान्तरीयकत्वात्सर्वथा-सत्त्वमसत्त्वं वापद्येत । तत्र च पक्षे भणितमेव दूषणं प्राक् । कथंचित्पक्षे पुनः सिद्धमेव साधनं, तदर्थमेव यत्यमानत्वात् । नाप्ययं विरुद्धो हेतुः, यतो विरुद्धार्थसाधनाद्विरुद्धो भवति । न च प्रमाणप्रतिभातं वस्तु तथा भवति । यदि च स्यात्, तदा प्रमाणान्वेषणं विशीर्येत । प्रमाणं हि यथावस्थितवस्तुव्यवस्थितये समाश्रीयते; सा चेत्ततो न स्यात्, किं तत्परीक्षणेनेति । नाप्यनैकान्तिकमिदं साधनं, प्रमाणपरीक्षणादेव । नापि कालात्ययापदिष्टोऽयं हेतुः, कालात्ययापदिष्टत्वं हि प्रत्यक्षानुमानबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वं, यथानुष्णस्तेजो वयवी कृतकत्वात्, घटवदिति । यथोष्णत्वग्राहिणा प्रत्यक्षेणानुमानेन च बाध्यमानत्वं प्रतिज्ञायाः, नैवमत्र प्रत्यक्षानुमानादिप्रमाणेनानेकधर्मपरि-

---

1 C omits from तत्तथा (l. 3) down to वस्तुजातम् (l. 5).

करितस्य वस्तुस्तोमस्याधिगम्यमानत्वात् । नापि प्रकरणसमः, तल्लक्षणविकलत्वात् । नापि विशेषणासिद्धत्वं हेतोर्दूषणमुद्भावनीयं, विशेषणासिद्धत्वं हि तदा स्याद्यदि स्वपरद्रव्याद्यपेक्षाभावेऽपि[1] सदसदादयो[2] धर्मा भवेयुः, यावता तदभावे न भवन्ति । [3]यदि च स्युः, तदा यथा स्वद्रव्याद्यपेक्षया सत्त्वं तथा परद्रव्याद्यपेक्षयापि सत्त्वं, तथा च तदेव घटादिवस्तु सर्वत्र प्राप्नोति । ततश्च सर्वपदार्थाद्वैतापत्तिलक्षणं दूषणमापद्येत । [4]यथा परद्रव्यापेक्षयासत्त्वं, तथा, यदि स्वद्रव्यापेक्षयाप्यसत्त्वं, ततः सर्वपदार्थशून्यतापत्तिप्रसङ्गः, ततश्च सकललोकव्यवहारोच्छेदः प्राप्नोति । दृश्यते चायमविगानेन प्रतिनियतरूपपदार्थापेक्षया व्यवहारः प्रवर्तमानः सर्वेषां भेदव्यवहारवादिनाम् । अतोऽसावनेन विशेषणेन व्यवस्थाप्यते । उक्तं च ।

सर्वमस्ति स्वरूपेण पररूपेण नास्ति च ।
अन्यथा सर्वसत्त्वं स्यात्स्वरूपस्याप्यसंभवः ॥

ततः कथं विशेषणासिद्धत्वं दोषः । ततः सकलदूषणरहितादतोऽनुमानाद्भवति स्वपरद्रव्यक्षेत्रकालभावाद्यपेक्षया सदसदाद्यनेकधर्मपरिकरितवस्तुसिद्धिः ॥

तत्र घटस्य कः स्वः कश्च पर इति । घटज्ञानाभिधानप्रवृत्तिलिङ्गः स्वः, तद्विपरीतः परः पटादिः । स्वपरात्मोपादानापोहनव्यवस्थापाद्यं हि वस्तुनो वस्तुत्वम् । यदि स्वोपादानपरिणतौ पटाद्यात्मव्यावृत्तिर्न स्यात्, सर्वात्मना घटः स्यात् । यदि च परात्मव्यावृत्तौ स्वात्मोपादानपरिणतिरपि न स्यात्, खरविषाणादिवदवस्त्वेव स्याद्घटः । अथवा नामस्थापनाद्रव्यभावघटेषु यो विवक्षितः स स्वः, इतरः पुनः परः । तत्र विवक्षितात्मना घटः, नेतरात्मना ।

---

1 B °पेक्षाया अभावेऽपि 2 A सदादयो 3 A premits ते 4 B premits तथा

अथवा सामान्येन घटेषु मध्ये कस्मिंश्चिद्विशेषे परिगृहीते प्रतिनियतो यः [1]संस्थानादिः स स्वः, इतरः पुनः परः। तत्र प्रतिनियतेन घटः, नेतरेण। यदीतरात्मकोऽपि स्यात्, एकघटमात्रप्रसङ्गः । ततश्च सामान्याश्रयो व्यवहारोऽपि न स्यात्। यद्वा तस्मिन्नेव घटविशेषे कालान्तरावस्थायिनि पूर्वोत्तरकुसूलान्तकपालादिकावस्थाकलापः परात्मा, तदन्तरालवर्तिपर्यायः स्वः। स तेनैव घटः, तत्कृतकर्मगुणव्यपदेशदर्शनात्, नेतरात्मना। यदि च कुसूलान्तकपालाद्यात्मकेनापि घटः स्यात्, घटावस्थायामपि तदुपलब्धिर्भवेत्, उत्पत्तिविनाशार्थपुरुषप्रयत्नफलाभावश्चानुषज्येत । अथान्तरालकालवर्तिपर्ययात्मनाप्यघटः स्यात्; घटकृत्यं फलं नोपलभ्येत। ऋजुसूत्रादिनयापेक्षयापि यत्स्वरूपं किंचनाभ्युपगतं, तदपेक्षया सन् घटः; द्रव्यापेक्षयापि यद्द्रव्यमुपादाय वर्तते, तदपेक्षया सन्, न द्रव्यान्तरापेक्षया। क्षेत्रापेक्षयापि यत्र क्षेत्रेऽवगाहः, तदपेक्षया सन्, न क्षेत्रान्तरापेक्षया। कालापेक्षयापि कुसूलान्तकपालादिविचालकाले सन्, न कालान्तरे। भावापेक्षयापि तस्मिन्विवक्षिते भावे वर्तमानः सन्, न भावान्तरे। आदिग्रहणात्स्वकार्यापेक्षया कर्ता, न परकार्यापेक्षया ॥ ततश्चेत्थमपेक्षया सदसदाद्यनेकधर्मपरिकरितं वस्तु समश्रीयमाणं सर्वज्ञशासने कथं व्यपदेशार्हं भवति। अतः सप्तभिः प्रकारैरभिधीयते। स्वद्रव्यक्षेत्रकालभावाद्यपेक्षया सन्परद्रव्यक्षेत्रकालभावाद्यपेक्षया चासन्प्रधानीकृतस्वरूपोऽप्रधानीकृतपरस्वरूपादिसत्त्वः " स्यात्सन् घटः " इत्युच्यते । स्वपरस्वभावोपेतव्यपोढस्वरूपत्वाद्वस्तुस्वभावस्येदं वाक्यमेकान्तसत्त्वप्रतिपादकवादिमतनिराकरणार्थमुच्यते । यतः स्याच्छब्दोऽयं क्रियाप्रतिरूपको निपातो विधिविचारणास्तित्वविवादानेका-

---

1 A योऽयं

न्तसंशयाद्यर्थवृत्तिः, तस्य चानेकान्तवादोद्द्योतनमेवार्थोऽत्र विवक्षितः षण्णां मध्ये विरुद्धधर्मापेक्षया चैकान्तासत्त्वप्रतिपादकवादिमतप्रतिषेधार्थं प्रोच्यते । "स्यादसन् घटः" इति स्वपरपर्यायान्यतरैकधर्मसंबन्धार्पणात्कालभेदेनोक्तम् । अधुना युगपद्विरुद्धधर्मद्वयसंबन्धार्पितस्य च वस्तुरूपस्याभिधायकः कीदृशो वाक्यप्रयोगो भवतीत्युच्यते । न खलु तादृशः शब्दोऽस्ति यस्तादृशीं विवक्षां पूरयेत्, यतोऽर्थान्तरवृत्तैः पर्यायैरवर्तमानमननुभवद्विवक्षितान् पर्यायान्द्रव्यं ब्रवीमीत्येका विवक्षा । अपरा तु निजैः पर्यायैः स्वात्मवृत्तैर्वर्तमानमनुभवत्स्वान्पर्यायान्द्रव्यं प्रतिपादयामीत्येवंरूपा । अनयोर्विवक्षयोः परस्परविलक्षणत्वाद्विरुद्धत्वाच्च द्वाभ्यामपि युगपदादेशे पुरुषस्यैकत्र द्रव्ये नास्ति संभवो वचनविशेषातीतत्वाच्चावक्तव्यत्वं, तथाभूतस्यार्थस्याभावात्तथारूपवाचकाभावाच्च । न हि विरुद्धयोर्धर्मयोरेकस्मिन्नधिकरणे काले वास्ति संभवः । ततश्चार्थस्य विरुद्धधर्मसंसृष्टस्याभावाच्छब्दस्य तथाभूतार्थवाचकस्यासत्त्वात् " स्यादवक्तव्यः " इत्युच्यते, स्याच्छब्दस्यैकान्तावक्तव्यतापक्षनिराकरणार्थत्वात्, अवक्तव्यादिशब्दैः प्रोच्यमानत्वात् । न हि सच्छब्दः सदसत्त्वे यौगपद्येन ब्रवीति । यदि ब्रूयात्, तर्हि स्वार्थवदसत्त्वमपि सत्कुर्यात् । तथासच्छब्दोऽपि नासत्सत्त्वे युगपद्ब्रवीति । यदि ब्रूयात्, तदा स्वार्थवत्सदप्यसत्कुर्यात् । विशेषशब्दत्वाच्च " सत् " इत्युक्ते न " असत् " अभिधीयते । न च " असत् " इत्युक्ते "सत्" इत्युक्तं भवति, शब्दे शक्तिस्वभावात् । सद्भावासद्भावपर्यायाणां सहभावार्पणमाश्रित्यातीतानागतपर्यायान्वा स्वीकृत्यैकशब्दवाच्यत्वेन तृतीयो विकल्पः । चतुर्थविकल्पः पुनरुभयप्रधानः स्वपरद्रव्यादिवृत्तिं समाश्रित्य वर्तमाना-

---

1 A °मानमनुभव°

तीतानागतपर्यायाणां प्राधान्यापेक्षया साक्षात्तदभिधायकशब्दद्वयप्रयोगात् “ स्यात्सन्नसंश्च घटः ” इति, वस्तुनोऽभिन्नस्यापि बुद्ध्या प्रविभागमाश्रित्य प्रयोगकरणात् समुच्चयात्मकवद्वृत्तसद्भावासद्भावपर्यायाणां विवक्षितत्वात् । पञ्चमविकल्पः पुनः स्वद्रव्याद्यपेक्षया[1] सद्भावपर्यायापेक्षया वा विवक्षितः । स्वपरद्रव्यापेक्षया सद्भावासद्भावपर्यायाणां चैकशब्देन युगपद्वाच्यत्वेन[2] विवक्षितश्च यदा भवति भावः, तदा “ स्यात्सदवक्तव्यो घटः ” इति प्रयुज्यते । षष्ठभङ्गकः पुनः परद्रव्याद्यपेक्षयासद्भावपर्यायापेक्षया वा यथा वाच्यत्वेन विवक्षितो भवति भावः, तथा सद्भावासद्भावपर्यायाश्च युगपद्वृत्ता वाच्यत्वेनेष्टाः, तदा “ स्यादसदवक्तव्यो घटः ” इति प्रयुज्यते । सप्तमभङ्गकस्तु सद्भावविवक्षायां सत्यामेकस्य द्वितीयस्य परद्रव्याद्यसद्भावपर्यायविवक्षायां सत्यां तृतीयस्य चोभयपर्यायाणां युगपद्वृत्तीनां विवक्षायां सत्यां “स्यात्सदसदवक्तव्यो घटः” इति निवर्तते, अनेकबुद्धिबुद्धत्वात्, द्रव्यपर्यायेषु सत्सु आत्मिका यतो भवति बुद्धिः । तथाहि । सद्रूपामसद्रूपामवक्तव्यरूपां च बुद्धिं भिन्नां विक्रमवतीमिवाश्रित्याभिन्नैका क्रमवस्तुरूपा वाक्यार्थबुद्धिर्भवति। तस्माद्भेदक्रमप्रतिभासविज्ञानहेतुत्वाद्भागास्ते भवन्त्यविभक्तस्यैकस्यापि वस्तुनः । एवं चानेकस्वभावेऽर्थे सति वक्तुरिच्छावशात्कदाचित्केनचिद्रूपेण वक्तुमिष्यते । विवक्षायत्ता च वचसः सकलादेशता विकलादेशता च द्रष्टव्या । तत्राद्येषु त्रिषु विकल्पेषु सकलमेवं[3] द्रव्यमादिश्यते “ स्यादस्ति ”, “ स्यान्नास्ति, ” “ स्यादवक्तव्यः ” इति। चतुर्थविकल्पादिषु पुनर्विकलीकृतं खण्डश आदिश्यते । तद्यथा। “ स्यादस्ति च नास्ति च ”, “ स्यादस्ति चावक्तव्यश्च ”, “ स्यान्नास्ति चावक्तव्यश्च ”, “ स्यादस्ति

---

1 C सद्द्रव्या° 2 A omits युगपद् 3 BC विकलमेव

च नास्ति चावक्तव्यश्च " इति[1] । यतो बुद्धिच्छेदविभक्तोऽवयवो देशः, तस्मिन्देश आदेशो भणनं देशादेशः, तेन[2] प्रोच्यमानत्वात् । अथवा द्रव्यरूपतया स्वरूपेणैवास्ति घटः पररूपेण पुनर्नास्ति घटः । आभ्यां रूपाभ्यां युगपद्विवक्षायां सच्छब्देनासच्छब्देन वा वाच्यत्वेन समाश्रीयमाणो[3] वाच्यो घटो यदास्तित्वं नास्तित्वं[4] च समुच्चयरूपतया वाच्यं भवति, तदा " अस्ति च नास्ति च घटः " । प्रथमतृतीयभङ्गसंयोगे " स्यादस्ति चावक्तव्यश्च " इति पञ्चमविकल्पः । यदा द्वितीयतृतीयभङ्गसंयोगः, तदा "नास्ति चावक्तव्यश्च" इति षष्ठो विकल्पः । यदा पुनः प्रथमद्वितीयतृतीयभङ्गानां संयोगः, तदा " स्यादस्ति च नास्ति चावक्तव्यश्च घटः " इति सप्तमो विकल्प इत्येवमर्थानुरोधाद्विवक्षावशाच्च सप्तधैव वचनप्रवृत्तिः, नान्यथा । प्रवृत्तिनिमित्ताभावादेष च मार्गो द्रव्यार्थपर्यायार्थाश्रयः, तौ च संग्रहाद्यात्मकौ, संग्रहादयश्चार्थशब्दनयरूपेण[5] प्रधाविताः[6] । तत्र संग्रहव्यवहारर्जुसूत्रैरर्थनयैर्यौ द्रव्यार्थपर्यायार्थौ तदाश्रयैषा सप्तभङ्गी प्ररूपिता । तत्रार्थनयाः सत्त्वान्यासत्त्ववर्तमानसत्त्वमात्रैषिणः प्रत्येकात्मकाश्च सप्तविधवचननिर्वर्तनप्रत्यलाविविक्तसत्तामात्रपरिग्रहात्सत्त्वं संग्रहः । अन्यासत्त्वमेव सत्त्वमिति व्यवहारः । वर्तमानप्रधानत्वाद्वर्तमानमेव सत्त्वमित्यृजुसूत्रम् । तत्र "स्यादस्ति" इति संग्रहः । " स्यान्नास्ति " इति व्यवहारः । संग्रहव्यवहारयोगात् " स्यादवक्तव्यः " । संग्रहव्यवहारयोगादेव " स्यादस्ति च नास्ति च " चतुर्थः । " स्यादस्त्यवक्तव्यश्च " इत्यत्र संग्रहः; संग्रहव्यवहारौ चाविभक्तौ । " स्यान्नास्ति चावक्तव्यश्च " इत्यत्र भङ्के व्यवहारः; संग्रहव्यवहारौ चाविभक्तौ । "स्यादस्ति

---

1 A omits 2 B C देशादेशत्वेन instead of देशादेशः, तेन. 3 A °माणे 4 BC omit 5 A संग्रहश्चार्थ° 6 A B प्रधावितः

स्यान्नास्त्यवक्तव्यश्च " इत्यत्र सप्तमभङ्गके विभक्तौ संग्रहव्यवहारावविभक्तौ चेत्येवमर्थपर्यायैः सप्तमवचने व्यवहारः । व्यञ्जनपर्यायाः पुनः शब्दनयाः । ते त्वभेदभेदद्वारेण[1] वचनमिच्छन्ति । शब्दनयस्तावत्समानलिङ्गानां समानवचनानां च शब्दानामिन्द्रशक्रपुरंदरादीनां वाच्यं भावार्थमेवाभिन्नमभ्युपैति, न जातुचिद्भिन्नलिङ्गं भिन्नवचनं वा शब्दम् । स्त्री दाराः, तथापो जलमिति, समभिरूढस्तु प्रत्यर्थशब्दनिवेशादिन्द्रः शक्रादीनां[2] पर्यायशब्दत्वं न प्रतिजानीते । अत्यन्तं भिन्नप्रवृत्तिनिमित्तत्वाद्भिन्नार्थमेवानुमन्यते घटशक्रादिशब्दानामिवेति, एवंभूतः पुनर्यथासद्भावं वस्तु वचसो गोचरमाप्रतीच्छति । चेष्टाविशिष्ट एवार्थो घटशब्दवाच्यः, चित्रालेखनोपयोगपरिणतचित्रकरवदिति । चेष्टारहितस्तिष्ठन् घटो न घटशब्दवाच्यः, तच्छब्दार्थरहितत्वात्, पटवदिति । एवमभेदभेदार्थवादिनोऽनेकैकशब्दवाच्यार्थावलम्बिनश्च शब्दप्रधानार्थोपसर्जनाः शब्दनयाः प्रदीपवदर्थस्य प्रतिभासका व्यञ्जनपर्यायसंज्ञकाः । तदेवमर्थव्यञ्जनपर्यायार्पणानर्पणद्वारकानेकात्मकैकार्थनिरूपणवदभिधानप्रत्ययविषयाविभावना विधेया। सप्तभङ्गिकायाः शब्दप्रवृत्तिनिबन्धनं भावघटमाश्रित्य तथान्येषामपि भावानां विषये सप्तभङ्गिका द्रष्टव्या घटदृष्टान्तेनैव । न च वक्तव्यं " ऋजुसूत्रादीनां शब्दार्थयोः संबन्धाभावादेव वाच्यवाचकभावो नास्ति, ततः कथमर्थविषये वाक्यप्रयोगः सप्तधा फलवान् " इति सप्तभङ्गिका समाप्ता ॥

[ V ]

## [ अथैकान्तनित्यानित्यवादभङ्गः ]

इह ह्येकान्तनित्यानित्यवस्तुवादितीर्थान्तरीयाभिमतसर्वज्ञस्य सद्भूतवस्तुवादित्वं न जाघटीति । तथाहि । ये

1 A त्वभेदे न भेदद्वारेण 2 A °दिन्द्रशक्रादीनां

तावदेकान्तनित्यं वस्त्विति प्रतिपन्नाः, तैरनित्यत्वं वस्तुनो नाभ्युपगतम् । येऽप्येकान्तानित्यमित्यभ्युपगताः, तैर्नित्यत्वं न प्रतिपन्नम् । न चैतद्युज्यते, यतो वस्तून्यर्थक्रियार्थिभिरर्थक्रियासमर्थान्यभ्युपगतानि । न चैकान्तनित्यमनित्यं वा वस्त्वर्थक्रियासमर्थं, यतोऽर्थक्रियां कुर्वन्पदार्थः क्रमेण वा कुर्याद्यौगपद्येन वा । क्रमेणापि कुर्वन्सहकारिकारणसापेक्षो[1] निरपेक्षो वा । तत्र न तावन्नित्यस्तन्निरपेक्षः क्रमेणार्थक्रियां करोति, यतः क्रमेणार्थक्रियाकरणमेकक्रियानन्तरं क्रियान्तरकरणम् । तच्च नित्यस्यैकस्वभावत्वान्न युज्यते, यतो यस्मिन् क्षणे प्रथमक्रियाकरणस्वभावो भावानां, न तस्मिन्द्वितीयादिक्षणकर्तव्यक्रियास्वभावः, तत्स्वभावत्वे हि प्रथमक्षणवर्तिक्रियाकरणवद्द्वितीयादिक्षणवर्तिक्रियाप्रसङ्गात् । तथा च युगपत्समस्तक्रियाणां करणाद्यौगपद्यपक्ष एव कक्षीकृतः । तत्र च युगपत्सकलक्रियाणां करणादुत्तरकालमनर्थक्रियाकारित्वादवस्तुत्वप्रसङ्गः । नापि[2] सहकारिकारणसापेक्षः क्रमेण नित्योऽर्थोऽर्थक्रियां करोति, यतः सहकारिकारणान्यपि नित्यानि स्युरनित्यानि वा । नित्यान्यपि क्रमेणोपकरणीयोपकरणस्वभावानि युगपद्वा । अनित्यान्यपि किं क्रमेणोपकरणस्वभावान्यन्यथा वा । न तावन्नित्यानि क्रमेणोपकरणीयोपकरणस्वभावानि, उपकार्यस्योपकारकस्य च नित्यतयैकस्वभावत्वात्क्रमकरणस्य च द्विस्वभावनियतत्वात् । नापि युगपन्नित्यान्यन्योपकारकरणस्वभावानि[3], युगपदुपकारकरणे क्रियाविरतावयस्तुत्वप्रसङ्गात् । नाप्यनित्यानि क्रमेणोपकारकरणस्वभावानि, यतः स उपकारे[4] उपकर्तव्यस्वभावानभिभावुकोऽभ्युपगन्तव्यः, अन्यथोपकारकत्वा-

1 A °कारणस्य सा° 2 A नोऽपि 3 C °करणप्रवणानि 4 A उपकारक

योगात् । ततश्च नित्यस्यानुपकर्तव्यस्वभावतया नित्यान्यप्युपकारकाणि न युज्यन्ते, किं पुनरनित्यानि क्रमेणोपकारकरणस्वभावानि नित्यस्वभावाभिभावुकानि[1] । तथाहि । सहकारिभिरुपकारस्तस्य नित्यस्य विधीयमानः किं व्यतिरिक्तो विधीयतेऽव्यतिरिक्तो वा । न तावद्व्यतिरिक्तः, व्यतिरिक्ते ह्युपकारे भावस्यानुपकृतत्वान्न तदुपकारकरणार्थक्रिया । ततः स्यात्तत्संबन्धित्वेन । "उपकारस्य करणादुपकारेण संबन्धादर्थक्रिया ततो भविष्यति" इत्यपि वक्तुं न शक्यते, यतो व्यतिरिक्तस्य संबन्धः कार्यकारणभाव एव । स च नित्यस्योपकारेण नास्ति, उपकारस्य स्वकारणेनैव जनितत्वात् । न च जनितस्यापि जननं, अतिप्रसङ्गात् । तस्मादव्यतिरिक्त एवोपकारोऽभ्युपगन्तव्यः । अव्यतिरिक्ते चोपकारेऽनित्यैः सहकारिभिः संजनिते नित्यस्याप्यनित्यस्वभावापत्तेर्नित्यस्वभावाभावो भवेत् । नापि युगपत्, तथात्वे हि क्रियाविरतावभावत्वप्रसङ्गात् । तन्न नित्यं वस्त्वर्थक्रियासमर्थमिति ॥

नाप्यनित्यं, यतोऽनित्यमप्यर्थक्रियां कुर्वत्क्रमेण कुर्यात्, यौगपद्येन वा । न तावत्क्रमेण, यतः क्रमो ह्येकक्रियाकरणानन्तरं द्वितीयकरणं, तच्चोत्पत्तिसमयसमनन्तरध्वस्ते न युज्यते, एकस्यैव कर्तुरेककरणानन्तरं द्वितीयं करोतीति व्यवहारदर्शनात्, न हि भिन्नस्य । तथाहि । भेदे व्यवहारोऽन्यथा दृश्यते, इदमनेनाद्यं निष्पादितं, इदं द्वितीयमनेनेति, क्षणिकत्वेनैकत्वं वस्तुनः समुत्पत्तिसमनन्तरमेव ध्वंसः स्यात्[2] । विनष्टस्य चार्थक्रियापि न संभवति, किं पुनरेककरणानन्तरं द्वितीयकरणं येन क्रमेण तत्रार्थक्रिया स्यात् । अथैकस्यैककरणानन्तरं द्वितीयकरणमिति भ्रान्तोऽयं व्यवहारः सदृशापरापरोत्पत्तिद-

1 B omits नित्यस्वभावाभि. 2 A ध्वंसात्.

र्शनविप्रलब्धबुद्धीनां; परमार्थतस्तु न क्रमेणैकं किंचित्, अनेककार्यकर्तृभिन्नानामेव भिन्नकार्यकर्तृत्वात् । तदप्रयुक्तं, यतोऽज्ञाननिबन्धनोऽयं व्यवहारः, न च क्षणिकस्य ज्ञानस्यैवंरूपव्यवहारनिरूपणनिपुणता[1] । तथाहि । ग्राह्यस्य ग्राहकस्य च निरन्वयविनाशे सति यत्प्रथमक्षणभावि रूपं न तद्द्वितीयादिक्षणेष्वस्तीत्यभ्युपगम्यते । ततश्च प्रथमक्षणभाविरूपग्राहकस्य ज्ञानस्य द्वितीयादिक्षणभाविभावरूपसमयेऽभावात्प्रथमक्षणे च द्वितीयादिक्षणभाविनामभावात्कस्तत्र सदृशापरापरोत्पत्तिदर्शनेन विप्रलब्धः । तस्माद्भवतामेवाननुभूतार्थवादिनां युक्तिरिक्तवचसां भ्रम इति । नापि यौगपद्येन, यतो यौगपद्यं युगपत्कर्तृत्वं, तच्चैककालमनेककर्तृत्वं; न चैकस्वभावस्य तद्युज्यते । तथाहि । भावः कार्यं कुर्वन्येनैव स्वभावेनैकं करोति द्वितीयमपि तेनैव, स्वभावान्तरेण वा । यदि तेनैव, कथं कार्यभेदः, कारणस्वभावनिबन्धनत्वात्कार्यभेदस्य । न च वाच्यं "सहकारिसामग्रीभेदात्कार्यभेदः" इति, यतस्तत्राप्ययं पर्यनुयोगस्तदवस्थ एव । तथाहि । किं येनैव स्वभावेनैकसहकारिसामग्र्यां सत्यां पिपर्ति किं द्वितीयसहकारिसामग्र्यामपि तेनैव, स्वभावान्तरेण वा । न तावत्तेनैव, कार्याभेदप्रसङ्गस्य तादवस्थ्यापत्तेः । न च तत्रापि सामग्र्यन्तरापेक्षा, अनवस्थापत्तेः । अथ स्वभावान्तरेण; तदानेकस्वभावत्वं भावस्य स्यात्तथा सामग्रीवैफल्यं च । स्वस्वभावेनैव भिन्नकार्यकरणे समर्थत्वात्केवलमेवमभ्युपगमे क्रियानेकान्तवादापत्तिः, तथा चाभ्युपेतबाधेति । तदेवं नित्यस्यानित्यस्य चार्थक्रियासमर्थत्वाभावादवस्तुत्वम् । अत्र प्रयोगः । यदर्थक्रियासमर्थं न भवति, तदवस्तु, यथा शशविषाणम् । न भवति

1 A °वंरूपं व्यव°

चार्थक्रियासमर्थमेकान्तेन नित्यमनित्यं च[1] वस्त्वित्युपरम्यतं एकान्तनित्यानित्यभङ्गः ॥ ५ ॥

[ VI ]

## [ अथ वादिघटमुद्गरवादः ॥ ]

इह पूर्वं पूर्वपक्षं कुर्वद्भिः सद्भिर्भवद्भिरभिमतसाध्यसाधनायेदमनुमानमुपन्यस्तम्। एतच्च सारेतरविचारचतुरचेतोभिर्विचार्यमाणं न चारुतया चतुरचेतसां चेतसि चकास्ति, साध्यसिद्ध्यनिबन्धनत्वात्साध्यसिद्ध्यनिबन्धनत्वं चास्य प्रत्यनुमानबाधितत्वात्। तथाहि। येन यत्र[2] यदर्थमुपन्यस्यमानेन तदर्थप्रतिपत्तिर्न जायते न तस्मिंस्तदुपन्यासार्हः; यथेह पटं प्रति घटः। न जायते च[3] भवद्भिरुपन्यस्यमानेनानेन साधनेन साध्यधर्मिणि साध्यप्रतिपत्तिरिति व्यापकविरुद्धोपलब्धिः। न च "व्यापकविरुद्धोपलब्धिरसिद्धतामात्मनि प्रकाशयति" इति वक्तुं युक्तं युक्तियुक्तचेतसां पुंसाम्। तदाहीयं व्यापकविरुद्धोपलब्धिरसिद्धतामात्मनि प्रकटीकुर्याद्यदि, केनापि प्रकारेण भवतोपन्यस्तस्य साधनस्य साध्यं साधयितुं सामर्थ्यं स्यात्। न च "निर्युक्तिकमभिधीयमानं कश्चिद्विपश्चिन्निश्चिनुयात्" इति कृत्वा। यथैवास्य भवतोपन्यस्तस्य साधनस्य साधयितुं साध्यं सामर्थ्यं न विद्यते, तथैव तर्कवितर्कसंपर्ककर्कशमतिभिरस्माभिर्न वेद्यते। परं तर्कवितर्कसंपर्ककर्कशमतीनामस्मादृशानां पुरतो वाचस्पतेरपि न प्रवर्तन्ते वाचः किं पुनर्भवादृशानाम्। अथ गर्वोद्धुरः सन्नबन्धुरबुद्धिरपि किमपि वावदीषि। तदानीं वद। पच्यतां त्वदीया अपि मण्डकाः, वयं पुनर्यद्येतावतीं भुवमागत्य सपूर्वपक्षोत्तरवादं न वदामः, तदानीं सैव निखिलत्रैलोक्यवन्दनीयपादारविन्दा काश्मीरमण्डलमण्डनं भगवती श्रीशारदा लज्जते। तत्रापि साध्यसिद्धिनिबन्धनं हेतुः;

1 A omits 2 BC यत्र यत्र 3 BC omit

यतोऽभाणि प्रामाणिकैर्विदुषां वाच्यो हेतुरेव हि केवलः । अतोऽस्माभिस्तस्यैव संबन्धिस्वरूपं विशेषतो निरूप्यते । तथाहि । साध्यं हि धर्मिणि साधनेन साध्यमानं किं सामान्यरूपेण साध्यते, विशेषरूपेण वा । तत्र न तावदाद्यः पक्षः, यतस्तेन प्रतिबद्धेन, अप्रतिबद्धेन वा । यद्यप्रतिबद्धेन साध्यते, तदा सर्वं सर्वतोऽपि स्यात्, अतिप्रसङ्गात् । ततो यथा "गौरयं" इत्युक्ते विषाणी बाहुलेयादिः प्रतीतिपथमवितथमवतरति, तथा काष्ठात्रिविष्टपप्रभृतीन्यपि प्रतीयुः । तथाहि । यो यो गोशब्दाभिधेयः स स विषाणी, यथा शबलशाबलेया[1]दिः । गोशब्दाभिधेयाश्च मरीचिविलोचनवचनकुलिशककुप्पयः स्वर्गभूतधात्र्यादय इति । न चैतद्भवति, केनाप्यनिष्टत्वात् । तत् "अप्रतिबद्धेन साध्यते" इत्यसाधीयः । अथ "प्रतिबद्धेन" इति भण्यते । तेनापि किं वाच्यवाचकलक्षणसंबन्धप्रतिबद्धेन, तादात्म्यतदुत्पत्तिसंबन्धप्रतिबद्धेन वा । यद्या[2]द्यः "प्रतिबन्धप्रतिबद्धेन" इति पक्षः, स न क्षोदक्षमः, तस्याघटमानत्वात् । तथाहि । वाच्यवाचकयोरिदं स्वरूपम् । वक्तीति वाचकः, उच्यत इति वाच्यम् । एतच्चात्र न युज्यते । साधनेन हि साध्यं धर्मिणि साध्यते, न चोच्यते "साध्यत इति साध्यं, साधयतीति साधकं" इति कृत्वा तन्न प्रथमो विकल्पः । नापि तादात्म्यसंबन्धसंबद्धेन, साध्यसाधनयोर्भेदेनाभ्युपगमात्तादात्म्यस्याभावात् । अथ "तदुत्पत्तिलक्षणसंबन्धप्रतिबद्धेन साधनेन" इत्युच्यते, तदा तदुत्पत्तौ किं साधनं साध्यादुत्पद्यते, साधनाद्वा साध्यम् । न तावत्साधनात्साध्यं समुत्पद्यते । तथाहि साध्यं साधननियतं स्यात्, न साधनं साध्यनियतम् । ततः साधनात्कथं साध्यावगतिर्भवेत्, "यदनुवादेन यद्विधीयते तत्तत्र नियतं, यद्यत्र

---

1 A शाबलेयादिः 2 A यद्याद्य

नियतं तत्तेन व्याप्तं; यद्येन व्याप्तं तत्तस्य गमकं, नान्यस्य" इति वचनात् । अथैतद्भयादेवाद्यः समाश्रीयते; तदा तेन साध्येन सह बन्धः साधनस्य किं सामान्यरूपेण, विशेषरूपेण वा । न तावद्विशेषरूपेण, न हि सामान्यरूपसाधनस्य विशेषरूपेण साध्येन सह संबन्धो भवति, सामान्यरूपयोः संबन्धाभ्युपगमात् । इतरथा सामान्यरूपस्य विशेषरूपेण संबन्धाभ्युपगमे न साधनात्सिद्धिसौधं साध्यमध्यासीत् । तथाहि । साधनं साध्यगमकत्वेनेष्यमाणं गृहीतव्याप्तिकं वा भवेत्, अगृहीतव्याप्तिकं वा स्यात् । यदि "अगृहीतव्याप्तिकं" इत्युच्यते, तन्न चतुरचेतसश्चमत्कारि[1], तथाभूतात्तस्मात्साध्यावगतेरभावात् । दासीचक्रीवतोरिव नापि गृहीतव्याप्तिकं, यतो व्याप्तिरप्यन्वयमुखेन वा स्यात्, व्यतिरेकमुखेन वा, "व्याप्तिर्व्यापकस्य तत्र भाव एव व्याप्यस्य वा तत्रैव भावः" इति वचनाद्विधाभिधीयमानत्वात् । द्विधापि किमेकदेशरूपा, सर्वोपसंहाररूपा वा । न तावत्सर्वोपसंहाररूपा । या हि पक्षसपक्षविभागमकृत्वा सामान्येन हेतोर्व्याप्तिः प्रदर्श्यते, सा सर्वोपसंहारव्याप्तिः, सा च विशेषरूपसाध्यसामान्यरूपसाधनयोः संबन्धासंभवेन संभावयितुमपि न युज्यते, किं पुनर्दर्शयितुम् । अथैकदेशरूपा व्याप्तिः, न सर्वोपसंहाररूपा, येनेदं दूषणमनुषज्यते; तदपि न, तस्या असंभवात् । संभवे वा यदि नाम निदर्शने साधने सति साध्यमुपलब्धं, किमेतावता तत्र तस्य नियतत्वमवगम्यते यावन्न यत्र यत्र साधनं तत्र तत्र[2] साध्यम् । तदभावे न क्वचिदपि साधनमुपलभ्यत इत्येवंरूपेण सर्वविषयिणी व्याप्तिरवगतोपदर्शिता च । तन्नैकदेशरूपापि । तदेवं प्रत्येकमुभयरूपाया अन्वयमुखेन व्यतिरेकमुखेन वा व्याप्तेर्विचार्यमाणाया

---

1 A चतुरचेतश्चम० 2 A B omit

दुर्घटत्वात् "गृहीतव्याप्तिकं" इत्ययमपि पक्षो विशीर्यते। तस्मान्न सामान्यरूपविशेषरूपयोः संबन्धो भवति। नापि सामान्यरूपयोः संबन्धः, यतस्तयोः किमाश्रितयोः, अनाश्रितयोर्वा। न तावदनाश्रितयोः, तयोरुपलब्धिलक्षणप्राप्तयोरप्यनुपलभ्यमानत्वेन संबन्धस्य ग्रहीतुमशक्यत्वात्। आश्रितयोरपि किं व्यक्त्याधारयोः,तद्व्यतिरिक्तयोर्वा। यदि व्यतिरिक्तयोः, तन्न, तयोरसंभवादेव, संभवित्वे वोपलब्ध्यादिप्राप्तेः। व्यक्त्याधारयोराश्रितयोरपि[1] किं साध्यमानसाध्ययुक्तव्यक्त्याश्रितयोः, अपरस्थितयोर्वा। न तावत्प्रथमः पक्षः, एकव्यक्तिसंश्रितयोः प्रतिबन्धस्याग्राह्यत्वात्, "द्विष्ठः संबन्धः" इति वचनात्। अथान्यस्थितयोस्तयोरपि किं पूर्वसापेक्षयोः, निरपेक्षयोर्वा। यद्यनन्तरः पक्षः, तदानन्तरोक्त एव दोषः। अथ सापेक्षयोः, तत्रापि साध्यमानधर्माश्रयनियतव्यक्तिदृष्टान्तलक्षणापरव्यक्त्योरेकस्मिन्देशे युगपदवस्थानाभावात्कथं तदाश्रयत्वं, येन संबन्धो गृह्यते। गृहीतोऽपि न साध्यसिद्धेरङ्गत्वाय जायते। यः किल सकलदेशकालव्याप्त्या प्रतिबन्धः साध्यसाधनयोः सिद्धः, स एवाभिमतसाध्यसाधनाय साधीयान्, न पक्षसपक्षमात्रगृहीतः। तस्मान्न सामान्यरूपयोरपि संबन्धग्रहः। भूयोऽपि। सामान्यरूपं साधनं किमुभयाश्रितं, अनुभयाश्रितं वा साध्यं साधयति। यदि तावदनुभयाश्रितं, तन्न, साधकत्वानुपपत्तिप्रसङ्गात्। तथाहि। यन्न प्रतिज्ञामाश्रितं नापि दृष्टान्तितं, तत्साधनं साध्यं कथं पक्षे साधनभावेन साधयेत्। नाप्युभयाश्रितं, तस्यासंभवात्। तथाहि। यत्साधनस्वरूपं सपक्षे समस्ति पक्षेऽपि किं तदेव, आहोस्विदन्यत्। यद्यन्यत्, कथमुभयाश्रितं, अन्यत्वादेव। अथ तदेवेति, कथमेकमेककालमुभयमाश्रयतीति। किं च। प्रत्येकपक्षप्रतिपादितदोषा-

1 A व्यक्त्याधारयोरपि

नुषङ्गेनैवोभयात्मकपक्षस्य दुष्टत्वान्नोभयाश्रितं साधनं साध्यसिद्धिं विदध्यात् । तन्न सामान्यरूपेण । अस्तु तर्हि विशेषरूपेण तेनापि किं यस्य साध्यधर्मः साधयितुमिष्टः, तद्धर्म्याश्रितेन, दृष्टान्तधर्म्याश्रितेन[1], उभयधर्म्याश्रितेन वा[2] । तत्र यद्याद्यः पक्षः, तदा दृष्टान्तः साधनविकलतालक्षणदोषमषीकालुष्यमङ्गीकुर्यात् । अथ दृष्टान्तधर्म्याश्रितेन साधनेन साध्यत इति पक्षः, तत्राप्यन्यधर्मस्यान्यत्राविद्यमानभावेन साधनस्यासिद्धान्ताभिधानो दोषोऽनुधावमानो न मनागपि विश्राम्यति । नाप्युभयगतेन, विशेषरूपत्वहानेः प्रत्येकनिराकरणेनोभयात्मकस्य निराकृतत्वाच्च, "प्रत्येकं ये प्रसज्यन्ते द्वयोर्भावे कथं न ते" इति वचनात् । अथाचक्षीथा इत्थं "धर्माणां किमेते साध्यधर्माश्रयाश्रिताः सपक्षलक्षणाश्रयाश्रिता वा" इत्यादि[3] यदि कल्प्यते, तदादः कार्यत्वान्यत्वलेशेन "यत्साध्यासिद्धिदर्शनं तत्कार्यसमं" इति वचनात्कार्यसमाभिधानम् । अनाबाधं जात्युत्तरं भवतां समासज्येतेति चेत्, तदयुक्तं, एतत्स्वरूपस्यापरिज्ञानात् । तत्स्वरूपं ह्येवं पूर्वाचार्यैरभ्यधायि । यत्र हि साध्येन सह सामान्यसाधनधर्मस्य विपक्षे बाधकप्रमाणप्रवृत्त्या प्रतिबन्धे सिद्धेऽपि धर्मविशेषमाश्रित्य प्रेरणा क्रियते, तज्जात्युत्तरं भवति । यत्पुनः सामान्येन प्रतिबन्धसिद्ध्यभावेन धर्मभेदकल्पना विधीयते, तत्सर्वथैव तदंशगन्धमपि न स्पृशतीति । अतोऽयुक्तं "यदुत कार्यसमे जात्युत्तरं" इति । अपि च । कीदृशमपि समस्तु, परं तदपि साध्यसिद्धिनिबन्धनाय विधीयमानं किं स्वतन्त्रभावेन वा स्यात्, प्रसङ्गसाधनं वा भवेत् । यदि स्वतन्त्रेण, तदा हेतुरन्यतमासिद्धत्वदोषदूषितः काचकामलोपजनितान्ध्य-

1 B C omit 2 B adds इति विकल्पौ 3 A adds कल्पना

परिकरितस्वरूपलोचनः पुरुष इव न साध्यावगमनमार्गनिभालनकरणप्रवणः स्यात् । तथाहि । यथाविधं साधनमनाबाधमस्माकमधिगतप्रसिद्धिकं किं भवतामपि तादृशं, किं वान्यादृशमिति विकल्पद्वयम् । तत्र यद्याद्यः कल्पनापथमवतार्यते, स नावतरति । तथाह्यधिगतनिरवधिसाधनपरंपरापरिचयव्यसनो भवदभ्युपगमः प्रसज्येत । ततः स्वातन्त्र्येण साधनमभ्युपेत्यास्मदभिमतसाधनस्वीकारं कुर्वन्नस्मत्पक्षमेव समर्थयसे । तन्न प्रथमो विकल्पः । नापि द्वितीयः । तस्मिन्नभिधीयमाने यथा ममेदं साधनं सिद्धं न तथा तव, अन्यरूपेण भवतः सिद्धत्वात् । अतः कथं नान्यतरासिद्धता हेतोः स्यात् । अथ शब्दमात्रेण सिद्ध एवावयोः कथमसिद्ध इति चेत् । न, शब्दमात्रसिद्धावपि न हेतुसिद्धिः[1] । वस्तुन एव हेतुत्वेन वस्तुनो हि वस्तुसिद्धिः[2],—

तस्यैव व्यभिचारादौ शब्देऽप्यव्यभिचारिणि ।
दोषवत्साधनं ज्ञेयं वस्तुनो वस्तुसिद्धितः ॥

इति वचनात् । तन्न[3] "स्वातन्त्र्येण" इति । अथ प्रसङ्गसाधनमिति पक्षसमाश्रयणादनन्तरोदितदोषापादनाभाव एव; तथापि विपर्यये गच्छतो न हेतोर्बाधकप्रमाणोपदर्शनं, तदभावादनैकान्तिकत्वं हेतोः । को ह्यत्र प्रतिबन्धः । यद्विवक्षितमेव साध्यं साधयति साधनं नाविवक्षितमपि । तस्मात्प्रसङ्गसाधनमिदं साधनमुपन्यस्यत इत्यपि पक्षोऽन्तरिक्षबिसप्रसूनसत्तामाश्रयतीति कथं साधनेन साध्यावगतिरित्यादि हेतुस्वरूपविचारणे वादिवृन्दारकविजयकरणे भो भोः पण्डित निरवद्यविद्यामण्डनमण्डित यदेतदास्माकीनं संस्कृतं केनाप्यतिरस्कृतमुद्दण्डदण्डकसारं तद-

1 A हेतुः सिद्धिः 2 A सिद्धेः BC add तथा चोक्तं 3 A omits तत्

र्णव इवालब्धपारं भवदिच्छयोच्यते मुच्यते वेति वादिघटमुद्गरोऽयं वादः[1] ॥ ६ ॥

[VII]

## [ अथ सामग्रीभङ्गवादः ]

कैश्चित्सामग्र्यभ्युपगम्यते । सा च समग्रेभ्यो भिन्ना वाभ्युपगम्यते, अभिन्ना वा । तत्र यदि भिन्ना, तदा[2] तस्यास्तैः सह कोऽयं संबन्धः किं तादात्म्यलक्षणः, तदुत्पत्तिलक्षणो वा । तत्र न तावत्तादात्म्यलक्षणः संबन्धो जाघटीति, यतस्तादात्म्ये हि सामग्री वा स्यात्, समग्रा वा स्युरिति । अथ तदुत्पत्तिलक्षणः, तदा हि सामग्र्या समग्रा जन्यन्ते, समग्रैर्वा सामग्री जन्यत इति पक्षद्वयम्[3] । तत्र न तावत्सामग्र्या समग्रा जन्यन्ते, स्वकारणकलापादेव तदुत्पत्तिरिति । अथ समग्रैः सामग्री जन्यते; तत्र प्रष्टव्यं "सा तैर्जन्यतेऽन्यसामग्रीसव्यपेक्षैः, तन्निर्व्यपेक्षैर्वा" । तत्र यद्यन्यसामग्रीसव्यपेक्षैः सामग्री जन्यते, तदापरस्याः सामग्र्या जननेऽपरा; तथापरस्या अपरेत्यनवस्थादौःस्थ्यं स्यात् । अथ निरपेक्षैः, तदा यथा समग्रैः सामग्री जन्यते, एवं कार्यमपि कस्मान्न जन्यत इति । तस्मात्समग्रेभ्यो भिन्ना सामग्री नास्त्येवेति विरम्यते सामग्रीभङ्गवादः ॥ ७ ॥

[VIII]

## [ अथ क्षणिकवादः ]

यत्सत्तत्सर्वं क्षणिकं, अक्षणिके क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् । तथाहि । तदक्षणिकं वस्तु क्रमेणार्थक्रियां कुर्यात्, यौगपद्येन वा । तत्र न तावदाद्यः पक्षः, यतोऽनागतकालभाविन्यामर्थक्रियायां यत्करणसामर्थ्यं तदाद्यक्षणे विद्यते वा न वा । विद्यते चेत्, तदाद्यक्षण एव

1 A omits 2 A omits 3 A पक्षं द्वयम्

किं न सर्वामर्थक्रियां करोति । न विद्यते चेत्, तदाद्यक्षणेऽविद्यमानसामर्थ्यं तस्यानागतक्षणे संवृत्तमिति कथं नानित्यत्वम् । अथ सहकार्यपेक्षयानागतक्षणेऽर्थक्रियां करोति । नन्वयं सहकारी किं परस्परोपकारित्वेन, एकार्थक्रियाकारित्वेन वा । तत्र न तावत्परस्परोपकारित्वेन, यतस्तस्य नित्यस्य पदार्थस्योपकारो विधीयमानोऽभिन्नो वा विधीयते, भिन्नो वा । तत्र यद्युच्येत "अभिन्नः," तदानीं तस्यात्मस्वरूपवद्विद्यमानत्वात्किं तेन सहकारिणा क्रियते । तथा तत्करणे तदभिन्नस्य नित्यपदार्थस्यापि करणं स्यात् । अथ भिन्नः, तदा भिन्नोपकारकरणेऽपि न तस्य किंचिदुपकृतं स्यात् । अथ तत्संबन्ध्युपकारः क्रियते; ननु संबन्धः किं तादात्म्यलक्षणः, तदुत्पत्तिलक्षणः, समवायलक्षणो वा । तत्र न तावत्तादात्म्यलक्षणः, भेदपक्षाङ्गीकरणात् । नापि तदुत्पत्तिलक्षणः, आद्य एव क्षणे भाविकार्योत्पादकोपकारप्रसङ्गात् । अथ सहकार्यपेक्षया करोति; तत्रापि ब्रूमः । किमिदं सहकारित्वं परस्परोपकारित्वं, एकार्थक्रियाकारित्वं वेत्याद्यावर्तनेनानवस्था । अथ समवायलक्षणः; तन्न, यतोऽसौ समवाय उपकार्योपकारकभावे सत्यभ्युपगम्यते, अनुपकार्योपकारकभावे वा । तत्र यद्याद्यः पक्षः, तदा न तदुत्पत्तिव्यतिरेकेण संभवति । तत्र चोक्त एव दोषः । अथानुपकार्योपकारकभावे[1] सति, तदातिप्रसङ्गः स्यात् । अथैकार्थक्रियाकारित्वलक्षणं सहकारित्वमभ्युपगम्यते । तदप्यनुपपन्नं, यतः सकलसहकार्यवस्थायां योऽस्य स्वभावः स केवलावस्थायां विद्यते वा न वा । विद्यते चेत्, किं न कार्यं करोति । तथा तस्मिन्स्वभावे विद्यमाने तत्सहकार्याकर्षणप्रसङ्गः, निगडाकर्षणे निगडबद्धपुरुषाकर्षणवत् । अथ न विद्यते, तर्ह्यसावुत्पद्यमानः

---

1 A भाव

कथं भावभेदं न कुर्यात्, भावभेदलक्षणत्वाद्वस्तुभेदस्य । अथ यौगपद्येनार्थक्रियां विधत्ते । तन्न, आद्यक्षणे समस्तकार्याणि कृत्वा द्वितीयक्षणे[1] किंचित्कार्यं करोति वा न वा । करोति चेत्, क्रमकारित्वप्रसङ्गः । अथ न करोति; तर्हि सत्त्वमपि नास्ति, अर्थक्रियाकारित्वलक्षणत्वात्सत्त्वस्य । प्रयोगश्चात्र । ये यद्भावं प्रत्यनपेक्षास्ते तत्स्वरूपनियताः, यथा समनन्तरफला सामग्री स्वकार्योत्पादे; विनाशं प्रत्यनपेक्षाश्चामी भावा इति स्वभावहेतुः । अथ यो यदन्वयव्यतिरेकावनुविधत्ते स तस्य कार्यमिति व्यपदिश्यते, यथा धूमो धूमध्वजान्वयव्यतिरेकानुविधायी तत्कार्यत्वेन व्यवह्रियते लोके; अनुविधत्ते च वेगवन्मुद्गराद्यापातान्वयव्यतिरेकौ विनाश इति कथं नानपेक्षत्वलक्षणो हेतुरसिद्ध इति चेत् । न, तदन्वयव्यतिरेकानुविधानस्यैवासिद्धेः । तदसिद्धिश्च विनाशहेतूनामकिंचित्करत्वात् । तथाहि । तैर्विनाशो विधीयमानो वस्तुरूपो वा विधीयेत, अवस्तुरूपो वा । वस्तुरूपोऽपि व्यतिरिक्तो वा[2], अव्यतिरिक्तो वा । अव्यतिरिक्तश्चेत्[3], वस्तुवन्निष्पन्नत्वात्किं विनाशहेतुभिर्विधेयं, विधाने वा भिन्नकालत्वाद्धेत्वन्तरजन्यत्वाच्च भिन्नः । उक्तं च । अयमेव हि भेदो भेदहेतुर्वा विरुद्धधर्माध्यासः कारणभेदश्च । ततोऽपि चेन्न भेदः, विश्वमेकद्रव्यं स्यात् । व्यतिरेकपक्षे तु न किंचिद्विनाशहेतुभिर्विनाश्यस्यापकृतं स्यात् । तत्संबन्धिनो विनाशस्य कारणात्कथं नापकृतमिति चेत्, कस्तत्र संबन्धः । न तावत्तादात्म्यलक्षणो व्यतिरेकपक्षे संभवति । नापि तदुत्पत्तिस्वरूपः, विनाशस्य विनाशहेतुभ्य एव प्रादुर्भावात् । न च वक्तव्यं "तत्कृतेन विनाशेन विनाशस्य विना-

1 B तृतीयलक्षणे 2 A B omits 3 B reads अव्यरिक्तश्चेदवस्तुवन्नि

शकरणादुपकारोऽपि व्यतिरेकाव्यतिरेकविकल्पद्वयानतिवृत्तेर्नाप्यवस्तुरूपः," तस्य करणेऽवस्तुत्वविरोधात् । तथाहि । यत्स्वकारणकलापायत्तजन्मकं तत्समस्तं वस्तुत्वेन व्यवह्रियते, यथा घटपटादिः । तादृशश्चासौ विनाशो भवद्भिरभ्युपगम्यत इति नास्यावस्तुरूपस्य करणम् । अथ ब्रूषे । नासौ विनाशो वस्तूत्पत्तिक्षणात्पाश्चात्यक्षणे प्रादुर्भवति, तदा वस्तुन एवानिष्पत्तेः, नापि वस्तूत्पत्तिक्षणे, तस्योत्पादविरुद्धत्वात्; नापि वस्तूत्पत्त्यनन्तरक्षणाद्वितीयक्षणे, तदा वस्तुनो विनष्टत्वात्, विनष्टस्य च विनाशकरणे विनाशाविरामप्रसङ्गात्, किं तु वस्तूत्पत्त्यनन्तरक्षण एव । ततश्च कादाचित्कत्वात्सहेतुकत्वापत्तिः स्तम्भादिभाववत् । उक्तं च ।

नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कदाचित्कत्वसंभवः ॥

किं च । अहेतुकत्वादसौ व्योमादिवन्नित्यः, किं वाकाशकुशेशयवदसन्निति विकल्पौ । आद्ये पक्षे वस्त्वनुत्पादप्रसङ्ग आपद्येत, वस्तूत्पादप्रत्यनीकस्य विनाशस्यावस्थितत्वात् । द्वितीयविकल्पे तु क्षणक्षयिता प्रत्ययो निरालम्बनः स्यात् । भावेषु तदेतदसमीक्षिताभिधानम् । तथाहि । कतरं विनाशमूरीकृत्यैतन्निगद्यते भवता । किं क्षणिकं वस्तुस्वभावं, अवस्तुस्वभावं वा । प्रथमपक्षे सहेतुकत्वं सिद्धं नः साध्यते तस्य स्वहेतुभ्य एवोत्पादाभ्युपगमादिति कथं विशरालुताप्रत्ययो निरालम्बनः स्यात्, वस्तूत्पत्त्यनन्तरभावित्वं वा घटेत । द्वितीयपक्षे तु नित्यादयो धर्मा वस्तुसंभविनोऽवस्तुनि समस्तशक्तिविरहलक्षणे विनाशे समाशंक्यमानाः कथं न भवतो निबिडजडिमानमाविष्कुर्युः, असत्त्वं तु तस्य स्वरूपतः सिद्धमेव । तथाहि । किं विनाशहेतुभिर्विनश्वरस्वभावानां भावानां विनाशो विधीयते, अविनश्वरस्व-

भावानां वा । आद्ये पक्षे कक्षीक्रियमाणे विनाशहेतूनामानर्थक्यं, यतो यो यः स्वभावः स स्वहेतोरेवोत्पद्यमानस्तादृशो भवति, न पुनस्तद्भावे हेत्वन्तरमपेक्षते, यथा प्रकाशद्रवोष्णकठिनादिस्वभावाः प्रदीपादयो न तत्स्वभावतायां हेत्वन्तरापेक्षिणः; विनश्वरस्वभावाश्च भावा भवद्भिरभ्युपगम्यन्ते । अथ यथा बीजमङ्कुरोत्पादस्वभावमपि तदुत्पादने जलेलानिलादिकं सहकारिकारणमपेक्षते, तद्वद्भावा अपि विनाशे भविष्यन्तीति चेत् । तन्न, यतः कतरस्य बीजस्य कारणापेक्षाभिधीयते, किमन्त्यावस्थाप्राप्तस्य कुशूलाद्यवस्थस्य वेति विकल्प्यते । अन्त्यावस्थाप्राप्तं तावद्धेत्वन्तरनिरपेक्षं स्वकार्यं जनयत्येव, कुशूलाद्यवस्थं तु तज्जननस्वभावमेव न भवति, कारणकारणत्वात्[1] । नापि "अविनश्वरस्वभावानां भावानां विनाशो विनाशहेतुभिर्विधीयते" इत्यभ्युपगन्तव्यं, वस्तूनां स्वभावान्यथात्वस्य पुरंदरशतैरपि कर्तुमशक्यत्वात् । अथ यथा ताम्रादीनां कठिनादिस्वभावानां वह्न्यादिभिरन्यथात्वं विधीयते, तथाविनश्वरस्वभावानामपि विनाशो विधातव्य इति चेत् । न, तत्रान्यथाकरणस्य दुरुपपादत्वात् । तथाहि । तस्मादन्यथात्वं भिन्नं वा विधीयते, अभिन्नं वा । अभेदे स एव निर्वर्तितो भवति, भेदे तु न किंचित्तस्यापकृतं स्यात् संबन्धाभ्युपगमे दूषणमुदीरितमेवेति न स्वभावान्यथात्वकरणमुपपद्यते, यतोऽपि नाम भावाः स्वयमेव भवेयुर्न पुनः स्वयं विद्यमानाः स्वस्वभावं परित्यज्य स्वभावान्तरमुररीकुर्युः । अथ कथं तर्हि ताम्रादीनां कठिनादिस्वभावापरित्यागेन द्रवादिरूपोपलम्भ इति चेत् । अत्रोच्यते । वस्तुव्यवस्थाकठिनादिस्वभावस्ताम्रादिः स्वरसतो निरुध्यमानो वह्न्यादिकारणम-

---

1 A कारणं कारणत्वात्

पेक्ष्याग्रेतनं द्रवादिरूपं ताम्रादिक्षणमुत्पादयति । सोऽपि स्वरसतो निरुध्यमानो वातादिकारणमपेक्ष्य कठिनादिरूपं जनयतीति सर्वथा सहेतुकत्वं विनाशस्य नाभ्युपगन्तुं युक्तम् । अभ्युपगमे वा सहेतुकत्वादेव कृतकत्वं[1], कृतकत्वाच्चानित्यत्वं, अनित्यस्य च विनाशस्य विनाशे पुनर्वस्तूनामुन्मज्जनप्रसङ्ग इति यथा विनाशस्य सहेतुकत्वं विशुद्धबुद्धिभिर्बौद्धमतानुसारिभिर्विचार्यते तथा तथा युक्तिरिक्ततामेव बिभर्तीति स्थितम् इति क्षणिकवादः ॥ ८ ॥

[IX]

## [ अथ वादिमीनानायः ]

इह हि निर्विकारमतयः सकलभुवनतलप्रख्यातमतयो निरवशेषविद्यापारावारपारगामिनो मीमांसका बौद्धाभिप्रेतां साकारतां मीमांसन्ते । प्रयोगश्चायम् । निखिलविशदाविशदविज्ञप्तीनां साकारता पक्षीकृता न विद्वज्जनमनांसि रञ्जयतीति साध्यो धर्मः प्रतीतिविषयातीतत्वात् । यद्यत्प्रतीतिविषयातीतं तत्तन्न विद्वज्जनमनांसि रञ्जयतीति, यथा सिन्दुरमकरमयूरादि गोमहिषरूपतया प्रतीयमानम् । तद्रूपतया प्रतीतिविषयातीता च निखिलविज्ञप्तीनां साकारता । ततश्च न विद्वज्जनमनांसि रञ्जयतीति व्यापकानुपलब्धिः । तथाहि । साकारता ज्ञानस्याप्रतीयमानाभ्युपगम्यते, प्रतीयमाना वा; प्रतीतिरपि प्रमाणेन वा, अप्रमाणेन वा; प्रमाणेनापि प्रत्यक्षेण, अनुमानेन वा; प्रत्यक्षेणापि योगिज्ञानेन, स्वसंवेदनेन, चक्षुरादिज्ञानेन वा; चक्षुरादिज्ञानमपि स्वज्ञानस्य साकारतां प्रतिपद्यते, ज्ञानान्तरस्य वा; ज्ञानान्तरस्यापि स्वजातीयस्य, विजातीयस्य वा; स्वजातीयस्याप्येकसंततौ, भिन्नसंततौ वा; सर्वस्य च भिन्नस्य ग्राहकं, उताग्राहकं; ग्राहकमपि चक्षुरादिज्ञानं स्वप्रामाण्य-

---

1 B omits

निश्चये, अन्यथा वा; प्रामाण्यनिश्चयोऽपि स्वतः, परतो वा; परतोऽपि प्रत्यक्षतः, अनुमानतो वा; अनुमानेनापि साध्यसाधनसंबन्धनिश्चयोत्पन्नेन, अन्येन वा; निश्चयोऽपि प्रत्यक्षेण, अनुमानेन वा; अनुमानेनापि किं तेनैव, अनुमानान्तरेण वा; संबन्धोऽपि तादात्म्यलक्षणः, तदुत्पत्तिलक्षणो वा, समवायलक्षणः, संयोगलक्षणो वा; संयोगलक्षणोऽपि संयुक्तयोः, असंयुक्तयोर्वा; असंयुक्तयोरपि संयोगयोग्ययोः, अयोग्ययोर्वेति सप्तत्रिंशद्विकल्पाः ॥ ३७ ॥

तत्र यद्यप्रतीयमाना, अयं पक्षः सोऽसंगतः, अप्रतीयमानायाः सत्त्वस्यासिद्धेः । अथ प्रतीयमाना; तत्र विकल्पद्वयं कृतं, "प्रमाणेन वा, अप्रमाणेन वा" इति । तत्र यदि "अप्रमाणेन" इति पक्षः, सोऽसंगतः, अप्रमाणस्याकिंचित्करत्वात् । अथ प्रमाणेन, तत्रापि विकल्पद्वयं कृतं "प्रमाणेनापि प्रत्यक्षेण, अनुमानेन वा" इति । तत्र प्रत्यक्षं यदि योगिज्ञानमभिप्रेतं, तदा वक्तव्यं "तद्योगिज्ञानं स्वसाकारतानिश्चये सति ज्ञानान्तरस्य साकारतां प्रतिपद्यते, अनिश्चये वा" । तत्र यद्याद्यः पक्षः, तदा साकारतानिश्चयः स्वतः, परतो वा । यदि स्वतः, तन्न संभवति, स्वात्मनि क्रियाविरोधात् । अथ परतः, तदा किं प्रत्यक्षेण, अनुमानेन वा । यदि प्रत्यक्षेण तदयुक्तम् । प्रत्यक्षं हि रूपादिविषयं रूपादिकमेवावलम्बते, न ज्ञानान्तरम् । ततश्च तत्राप्रविष्टं कथं तस्य साकारतां निश्चिनोति । अथानुमानेन; तदप्ययुक्तम् । तथाहि । अनुमानं लिङ्गादुत्पद्यते, लिङ्गं च विवक्षितभावधर्मः, अन्यभावधर्मः, अभावधर्मः, उभयधर्मो वा । तत्र यदि विवक्षितभावधर्मो हेतुरिति निश्चीयते, तदानुमानवैयर्थ्यम् । अथान्यभावधर्मो हेतुः, तदा व्यधिकरणासिद्धो हेतुः । अथाभावधर्मः, तदा विरुद्धो हेतुः । अथोभयधर्मः, तदानैकान्तिको हेतुः । तन्नानु-

मानेनापि साकारता निश्चीयत इति न योगिज्ञानं साकारतानिश्चये ज्ञानान्तरस्य साकारतां निश्चिनोति । नापि वेदनेन ज्ञानान्तरस्य साकारतां निश्चीयते, स्वात्मनि क्रियाविरोधात् । न हि तेनैवाङ्गुल्यग्रेण तदेवाङ्गुल्यग्रं स्पृश्यते । नापि चक्षुरादिज्ञानेन, यतस्तत्र विकल्पद्वयं कृतं "स्वज्ञानस्य साकारतां निश्चिनोति, ज्ञानान्तरस्य वा" । तत्र न तावत्स्वज्ञानस्य साकारतां निश्चिनोति, तद्विषयादुत्पन्नं विषयस्वरूपमेवावलम्बते न च स्वज्ञानमेवावलम्बते, तेन सह तस्य संबन्धाभावात् । नापि ज्ञानान्तरस्य साकारतां निश्चिनोति, यतश्चक्षुरादिज्ञानं ज्ञानान्तरग्राहकं सत् साकारतां निश्चिनोति, अग्राहकं वा । तत्र यदि ग्राहकं, तदयुक्तम् । चक्षुरादिज्ञानं हि रूपादुत्पन्नं रूपादिकमेवावलम्बते, न ज्ञानान्तरम् । ततश्च कथं साकारतां निश्चिनोति । अथाग्रहं; तदप्ययुक्तम् । यद्यत्स्वरूपं न जानाति तत्कथं तस्य साकारतां निश्चिनोति । एतेनैव " स्वजातीयस्य, विजातीयस्य, एकसंततौ भिन्नसंततौ वा " इति विकल्पचतुष्टयं निराकृतं द्रष्टव्यम् । चक्षुरादिज्ञानमपि स्वप्रामाण्यनिश्चये, अन्यथा वा । तत्र यदि " स्वप्रामाण्यनिश्चये" इति पक्षः, तत्र "प्रामाण्यनिश्चयः स्वतः परतो वा" इति विकल्पद्वयं कृतम् । तत्र यदि स्वतः, तदयुक्तं, यतस्तस्यैव निश्चये निश्चेयत्वं निश्चायकत्वं च न संभवति, कर्तृकर्मणोरत्यन्तभिन्नत्वात् । अथ परतः, तदा वक्तव्यं " कारणगुणज्ञानाद्बाधाभावाद्वा " । तत्र यदि कारणगुणज्ञानात्, तदा तत्रापि वक्तव्यं " किं कारणगुणज्ञानं स्वकारणगुणज्ञानापेक्षं सत् प्रमाणकारणगुणनिश्चायकं भवति, अनपेक्षं वा " । तत्र यदि सापेक्षं, तदानवस्था । अथानपेक्षं; तर्हि कारणगुणज्ञानापेक्षया किं प्रयोजनम् । अथ बाधकाभावात्, तदा सो बाधाभावो ज्ञातः सन् प्रामाण्यनिश्चायको

भवति, अन्यथा वा । तत्र यदि ज्ञातः, तदा किं तेनैव, आहोस्विदपरस्माद्बाधाभावात् । तत्र यदि तेनैव, तदेतरेतराश्रयदोषः । तथाहि । तत्प्रामाण्ये सति बाधाभावनिश्चयो बाधाभावनिश्चये तत्प्रामाण्यमिति व्यक्तमितरेतराश्रयत्वम् । अथ "अपरस्माद्बाधाभावाद्बाधाभावनिश्चयः" इति पक्षः; तर्ह्यनवस्थालक्षणो दोषः । किं च । बाधाभावज्ञानस्य सत्यत्वं कुतः प्रमेयसत्यत्वात्, संवादकत्वाद्वा । तत्र यदि प्रमेयसत्यत्वात्, तदा प्रमेयसत्यत्वे बाधाभावसत्यत्वं, बाधाभावसत्यत्वे प्रमेयसत्यत्वम् । अथ द्वितीयः, तदा तत्राप्यपरसंवादापेक्षायामनवस्था, तज्ज्ञानान्तरादपि न प्रामाण्यनिश्चयः । किं च । परतोऽपि; प्रत्यक्षेण, अनुमानेन वेति विकल्पद्वयं कृतम् । तत्र यदि "प्रत्यक्षेण" इति पक्षः, असावसंगतः, यतः प्रत्यक्षमिन्द्रियसंबद्धेऽर्थ उत्पद्यते, न च ज्ञानान्तर इन्द्रियसंबन्धोऽस्ति, तस्यातीन्द्रियत्वात् । तत्कथं प्रत्यक्षं तत्प्रामाण्यनिश्चायकं भवतीति । अथ "अनुमानेन" इति पक्षः, तदा तत्र विकल्पद्वयं कृतम् । अथानुमानेनापि, साध्यसाधनसंबन्धनिश्चयोत्पन्नेन, अन्येन वेति । तत्र यदि साध्यसाधनसंबन्धनिश्चयोत्पन्नेन, तदा तत्रापि विकल्पद्वयं कृतं "निश्चयोऽपि प्रत्यक्षेण, अनुमानेन वा" । तत्र यदि "प्रत्यक्षेण" इति पक्षः, तदा किं धर्मविषयेण, धर्मिविषयेण, उभयविषयेण वा । तत्र यदि धर्मविषयेण, तदयुक्तं, यतः संबन्धो द्विष्ठः स कथं धर्ममात्रग्रहणे निश्चितो भवति । धर्मिग्रहणेऽप्येतदेव वाच्यम् । अथोभयविषयेण; तदा तत्र वक्तव्यं "तदुभयविषयं प्रत्यक्षं किमेकाकारं, उभयाकारं, अनुभयाकारं वा" इति त्रयो विकल्पाः । तत्र यद्येकाकारं, तदा कथमुभयस्य ग्राहकं भवति । अथोभयाकारं; तच्च न संभवति विरोधमनुपहृत्य । अनुभयाकारपक्षोऽपि न संभवति, एकप्रतिषे-

धस्योभयविधिनान्तरीयकत्वात् । तन्न प्रत्यक्षेण संबन्धनिश्चयः । अथानुमानेन; तत्र च विकल्पद्वयं कृतं "किं तेनैव, अपरेण वा" इति । तत्र यदि तेनैव, तदेतरेतराश्रयलक्षणो दोषः । अथान्येन, तदानवस्थालक्षणो दोषः । संबन्धोऽपि तादात्म्यलक्षणः, तदुत्पत्तिलक्षणो वेति । तत्र यदि तादात्म्यलक्षणः, तदासौ न गम्यगमकभावनिबन्धनं; गम्यगमकभावो भेदे सति भवति, तादात्म्ये च सति साधनप्रतीतिकाल एव साध्यस्यापि प्रतिपन्नत्वात् । अथ न प्रतीयते; तर्हि यस्मिन्प्रतीयमाने यन्न प्रतीयते तत्ततो व्यतिरिक्तमेव, यथा घटस्वरूपे प्रतीयमाने पटस्वरूपमप्रतीयमानं ततो व्यतिरिक्तमिति । न प्रतीयते च साधनप्रतीतिकाले साध्यं; ततश्च न तयोस्तादात्म्यम् । तदुत्पत्तिलक्षणोऽपि संबन्धो न गम्यगमकभावनिबन्धनम् । तथाहि । कार्यत्वाविशेषे यथा धूमो वह्नेर्गमकः, तथा वक्तृत्वमपि किं नासर्वज्ञस्य निश्चायकं भवति । नापि समवायलक्षणः संबन्धः, प्रामाण्यसमवेतलिङ्गाभावात् । नापि संयोगलक्षणः संबन्धः, यतस्तत्र विकल्पद्वयं कृतं "संयोगोऽपि संयुक्तयोः, असंयुक्तयोर्वा" । तत्र यदि संयुक्तयोः, तदा संयोगः सामान्याश्रयो वा, विशेषाश्रयो वा । यदि सामान्याश्रयः, तदा धूमवद्वह्निरपि धूमस्य गमको भवेत्, विशेषाभावात् । अथ विशेषाश्रयः, तदा धूमस्तार्णादिभेदानां गमकः स्यात् । तन्न संयोगवशाद्गम्यगमकभावः । अथासंयुक्तयोः; तत्र विकल्पद्वयं कृतं "योग्ययोः, अयोग्ययोर्वा" इति । तत्र न तावद्योग्ययोः । तथाहि । किं पूर्वं संयोग उत्तरकालं योग्यता, अथ पूर्वं योग्यतोत्तरकालसंयोगः । तत्र यदि पूर्वं संयोगः, तदोत्तरकालभाविन्या योग्यतया किं प्रयोजनं, संयोगस्य वृत्तत्वात् । अथ पूर्वं योग्यतोत्तरकालं संयोगः, तदासौ योग्यता संयोगाभावे कथं निश्चीयते,

कार्यगम्यत्वात्कारणशक्तीनाम् । तन्न "योग्ययोः" इति वाच्यम् । अथायोग्ययोः; तन्न युक्तम् । न ह्ययोग्ययोः साध्यसाधनयोरिव संयोगः संभवतीत्युपरम्यते ॥ इति वादिमीनानायः ॥ ९ ॥

[ X. ]

## [ अथ शाब्दप्रमाणनिराकरणम् ॥ ]

यन्निर्विषयं तत्समस्तमेवाप्रमाणं, यथा मरीचिकासु जलविज्ञानम् । निर्विषयं चेदं शाब्दविज्ञानम् । न चायमसिद्धो हेतुः, यतोऽस्य विषयः परिकल्प्यमानः स्वलक्षणं वा स्यात्, सामान्यं वा । न तावत्स्वलक्षणं, तस्य संकेतवशेन विषयत्वापत्तेः; स च विविक्तक्षणक्षयिपरमाणुलक्षणे कर्तुमशक्यः । तथाहि । प्रथमे क्षणे स्वलक्षणदर्शनं[1], द्वितीयक्षणे संकेतलक्षणाध्यवसायः, तृतीयक्षणे संकेतः कर्तव्यः, तस्मिंश्च स्वलक्षणस्य क्षणक्षयिकत्वेन क्षीणत्वात्संकेतकरणानुपपत्तेः । नापि सामान्यं, तस्य स्वत एवाविद्यमानत्वात् । तथाहि । यत्प्रमाणगोचरचारितां नाचरति, न तत्सद्व्यवहृतिपथमवतरति, यथाकाशकुशेशयम् । नाचरति च प्रमाणगोचरचारितां सामान्यमिति । न चायमसिद्धो हेतुः, यतस्तत्सामान्यं प्रत्यक्षप्रमाणपरिच्छेद्यं वा स्यात्, अनुमानसंवित्संवेद्यं वा । तत्र न तावदाद्यः पक्षः कक्षीकरणीयः, यतः सकलव्यक्तिगतं सामान्यं तत्प्रत्यक्षीकरणे समस्तव्यक्तिप्रत्यक्षत्वेन सर्वज्ञत्वापत्तिः स्यात्; न चेष्यते । नापि द्वितीयः, यतोऽनुमानं प्रतिबद्धलिङ्गबलेनोदीयमानं प्रमाणतामासादयति । स च संबन्धः किं प्रत्यक्षेण गृह्यते, अनुमानेन वा । तत्र न तावत्सामान्यरूपावधारणानिपुणेन प्रत्यक्षेण संबन्धग्रहणं युज्यते, यतः द्विष्ठसंबन्धसंवित्तिर्नैकरूपप्रवेदना । नाप्यनुमानेन, यतोऽनुमानेन संबन्धो गृह्य-

1 B स्वलक्षणं दर्शनं

माणः किं तेनैवानुमानेन गृह्यते, उतानुमानान्तरेण वेति द्वयी गतिः । तत्र यदि तेनैवानुमानेनायं पक्षोऽङ्गीक्रियते, तदेतरेतराश्रयदोषः, यतो न यावदनुमानं प्रवृत्तं न तावत्संबन्धग्रहः, न यावत्संबन्धो गृहीतस्तावदनुमानं न प्रवर्तत इति स्फुटमेवेतरेतराश्रयत्वमिति । अथानुमानान्तरेणेति, तर्ह्यनवस्था । तथाहि । अपरेणानुमानेन संबन्धो ग्रहीतव्यः, तदप्यनुमानं संबन्धग्रहपूर्वकं भवति, तस्यापि संबन्धोऽपरेण ग्रहीतव्य इत्यनवस्था प्रवर्तमाना वर्षशतेनापि न निष्ठां प्राप्नोति । किं च । तत्सामान्यं व्यक्तिभ्यो भिन्नं वा स्यात्, अभिन्नं वेति विकल्पद्वयम् । तत्र यद्यभिन्नं, तर्हि व्यक्तिभ्यः सामान्यमभिन्नं सामान्याच्च व्यक्तय इति सामान्यं वा स्याद्व्यक्तयो वा न द्वितयम् । तथा तत्सामान्यमभिन्नं सत्किं व्यक्तिभिः सार्धं समुत्पद्यते, व्यक्त्यन्तराद्वा समागच्छति पूर्वमेव वा तद्देशे समासीत् । तत्र यद्याद्यः पक्षः, तर्हि व्यक्तिवदनित्यत्वप्रसङ्गः । अथ द्वितीयः, तर्हि सक्रियत्वं स्यात् । अथ तृतीयः, तर्हि व्यक्तिशून्ये देशेऽवस्थानं प्राप्नोति । न चेष्यते । तथाहि व्यक्तिविनाशे किं सहैव विनश्यति, अथ व्यक्त्यन्तरं याति, उत तद्देश एव तिष्ठति । दूषणानि प्रागुक्तान्येव । तथा चोक्तम् ।

व्यक्तिजन्मन्यजाता चेदागता नाश्रयान्तरात् ।
प्रागासीन्न च तद्देशे सा तया संगता कथम् ॥ १ ॥
व्यक्तिनाशे न चेन्नष्टा गता व्यक्त्यन्तरं न च ।
तच्छून्ये न स्थिता देशे सा जातिः क्वेति कथ्यताम् ॥२॥

अथ भिन्नं, तर्हि तद्व्यावृत्ताकारं वा स्यात्, अनुगताकारं वेति विकल्पद्वयम् । तत्र यदि व्यावृत्ताकारं, तर्हि व्यक्तिरूपतैव तस्य स्यात्, न किंचित्सामान्यम् । अथानुगताकारं; सोऽनुगमः स्वरूपे, पररूपे वेति विकल्पौ ।

चेत्स्वरूपेऽयं पक्षोऽभ्युपगम्यते, सोऽनुपपन्नः, स्वरूपेऽनुगमाभावात् । अथ पररूपे; ननु पररूपेऽप्यनुगमः किं तादात्म्यात्, समवायाद्वा । तत्र न तावत्तादात्म्यात्, व्यतिरेकपक्षकक्षीकारात् । नापि तत्समवायात्, सामान्यस्य समवायादर्थान्तरत्वेनाभ्युपगमात् ॥

अथ यदबाधितबोधगोचरचारि तत्समस्तं समस्ति, यथा स्तम्भकुम्भाम्भोरुहादयः पदार्थाः; अबाधितगोचरचारि च सामान्यमिति सामान्यसाधकस्यानुमानस्य विद्यमानत्वात्कथं प्रमाणाभावो भवता शंक्येतेति ब्रूषे । तदप्यनुपपन्नं, अबाधितबोधगोचरस्यापि वृत्तेर्विकल्पैर्बाध्यमानत्वात् । तथाहि । तत्सामान्यं व्यक्तिषु वर्तमानमेकदेशेन वा वर्तते, सामस्त्येन वेति द्वयी गतिः । यद्युच्यते "एकदेशेन", तदनुपपन्नं, सामान्यस्य निरंशत्वेनाभ्युपगमात् । भवतु वांशः; तथापि किं येनैवांशेनैकस्यां व्यक्तौ तत्सामान्यं वर्तते तेनैवांशेन व्यक्त्यन्तरेऽपि, आहोस्विदंशान्तरेणेत्यत्रापि कल्पनाद्वयम् । तत्र यद्याद्यः पक्षः कक्षीक्रियते, तर्ह्येकेनैवांशेन क्रोडीकृतत्वात्सर्वासां व्यक्तीनामेकत्वापत्तिः । अथांशान्तरेण, तर्ह्यंशेन खण्डीभूतत्वात्सामान्यस्य निःसामान्यतापत्तिः स्यात् । अथ सामस्त्येन वर्तते, तर्ह्येकस्यां व्यक्तौ सामस्त्येन वृत्तत्वाद्द्वितीया व्यक्तिः सामान्यशून्या प्राप्नोति । तथा तत्सामान्यमसमानासु व्यक्तिषु वर्तते, समानासु वा । तत्र यद्यसमानासु, तर्हि गोत्वसामान्यं यथा गोषु वर्तते, एवं महिष्यादिष्वपि वर्तेत, अविशेषात् । अथ समानासु; तदा समानत्वं स्वत एव विद्यते, सामान्येन वा क्रियते । तत्र यदि स्वत एव विद्यते, तदा समानत्वस्य स्वत एव विद्यमानत्वात्तत्र प्रवर्तमानसामान्यमकिंचित्करमेव स्यात् । अथ सामान्येन क्रियते; तन्ननु

तेनैव सामान्येन क्रियते, सामान्यान्तरेण वा। तत्र यदि तेनैव, तदेतरेतराश्रयदोषः। तथाहि। तत्समानत्वे सति सामान्यं प्रवर्तते, सामान्ये प्रवृत्ते समानत्वं जायत इतीतरेतराश्रयत्वम्। अथ सामान्यान्तरेण, तर्ह्यनवस्था। तथाहि। अपरेण सामान्येन समानत्वं कर्तव्यं, तदपि सामान्यं समानासु व्यक्तिषु वर्तते, तासामपि समानत्वमपरेण सामान्येन विधेयमित्यनवस्था दुर्दान्तकुट्टिनीव पृष्ठतो धावमाना वर्षसहस्रेणापि नावस्थानमङ्गीकरोतीति यथा यथा विशुद्धबुद्धिभिर्बौद्धैर्विचार्यते सामान्यं, तथा तथा जीर्णकुटीरकमिव विशीर्यते नावस्थां बध्नाति॥ इति स्थितं शब्दप्रमाणनिराकरणम्॥ १०॥

[ XI. ]

## [ अथ कार्यकारणभङ्गः ]

यद्युक्तिप्रमाणानधीनसत्ताकं न तत्प्रेक्षावतां व्यवहारावतारि, यथा व्योमारविन्दम्। युक्तिप्रमाणानधीनश्चासौ कार्यकारणभावलक्षणः प्रतिबन्धः। न चायमसिद्धो हेतुः। तथाहि। असौ कार्यकारणभावलक्षणः प्रतिबन्धस्ताभ्यां भिन्नस्वभावो वा स्यात्, अभिन्नस्वभावो वा; भिन्नस्वभावोऽपि तयोः कार्यकारणयोः क्षणिकस्वभावयोर्वा वर्तेत, अक्षणिकस्वभावयोर्वा; क्षणिकस्वभावयोरपि प्रागप्रतिपन्नकार्यकारणरूपयोर्वा यद्वा स्वभावेनैव कार्यकारणरूपयोः। तत्र यद्याद्यः पक्षः, तदा न युक्तं सर्वत्रैव कार्यकारणरूपेषु स्तम्भकुम्भाम्भोरुहादिषु पदार्थेषु भवेत्, तन्नियमकारणाभावात्। तथा तेन भिन्नस्वभावेन संबन्धेनानयोः पूर्वरूपापनोदो विधीयते, पूर्वरूपसमुत्पादो वेति विकल्प्यते। न तावदाद्यः पक्षो ज्यायान्, विनाशहेतूनामाकिंचित्करत्वेन विनाशस्याभावात्। तथाहि। असौ विनश्वरस्वभावानां भावानामभ्युपगम्यते, अविनश्वरस्वभावानां वेति

द्वयी गतिः, गत्यन्तराभावात्। यदि विनश्वरस्वभावानां भावानां, तर्हि तेषां स्वहेतुसंदोहादेवोत्पन्नत्वात्किं तत्र हेतुभिः कार्यम्। अथाविनश्वरस्वभावानां भावानां; इदमप्यसुन्दरं, यतो ये भावाः स्वहेतोरेवाविनश्वरस्वभावाः समुत्पन्नाः, ते पुरन्दरशतैरपि नान्यथा कर्तुं शक्यन्ते, किमङ्ग पुनर्व्यतिरिक्तसंबन्धमात्रेण। नापि तेन संबन्धेनापूर्वरूपसमुत्पादः, तस्यापूर्वरूपस्य ताभ्यां भिन्नहेतुकत्वादर्थान्तरप्रसङ्गः। न हि निष्पन्नेष्वनिष्पन्नो भिन्नहेतुकस्तत्स्वभावो युक्तः, यतोऽयमेव हि भेदो भेदहेतुर्वा विरुद्धधर्माध्यासः कारणभेदश्च। ततश्चेन्न भेदो विश्वमेकद्रव्यं स्यात्। ततश्च सहोत्पादविनाशौ स्याताम्। ततश्चार्थान्तरोत्पादात्कार्यकारणरूपे वस्तुनी तदवस्थे एवेति न तयोरन्ययोगेऽपि कार्यकारणरूपतापत्तिः। अथ द्वितीयपक्षः; तदा स्वभावत एव तयोः कार्यकारणरूपत्वात्कथं व्यतिरिक्तः संबन्धो वैयर्थ्यं नानुभवेत्। तथासौ संबन्धस्ताभ्यां कार्यकारणाभ्यां सहिताभ्यां जन्यते, असहिताभ्यां वेति भागीरथीविपुलपुलिनादवतरच्चक्रवाकयुगलमिव विकल्पद्वयममलमवतारमारचयति। तत्र यद्याद्यः पक्षः कक्षीक्रियते, तदासावनुपपन्नः। कार्यकारणयोः क्षणिकत्वेन चिरविनष्टत्वात्कथं कार्यकारणबुद्धिस्तन्निबन्धना स्यात्। नापि प्रत्येकजन्यः, यतोऽसौ कारणेन जन्यमानः संबन्धः स्वकार्यसहितो जन्यते, केवलो वेति विकल्प्यते; केवलोऽपि स्वकार्यात्पूर्वं, पश्चाद्वा। तत्र स्वकार्यसहितश्चेत्समुत्पद्यते, तदोभयोरप्यन्यतोभावात्परस्परमसंबन्ध एवेति कार्यसंबन्धतास्य हीयते। अथ स्वकार्यात्पूर्वं कार्ये कारणेन जन्यते, तदा कारणस्य क्षणिकत्वेन चिरविनष्टत्वात्कथं स्वकार्यकरणम्। तदभावे कारणव्यापारोऽपि न स्यादिति कारणेन कथं कार्यकारणभावलक्षणः संबन्धो जन्यते। अथ स्वकार्यमु-

त्पाद्य पश्चादसौ संबन्धोऽनेन जन्यते; तदापि स्वकार्यकाल एव विनष्टत्वात्तदुत्तरभाविकार्यकरणसंबन्धजननं कुतः स्यादिति कथं कार्यकारणयोरसहभावित्वात्संबन्धस्य द्विष्ठता । नाप्यक्षणिकरूपयोः कार्यकारणयोः प्रागप्रतिपन्नतदाधारतयोर्न पश्चादपि संबन्धाधारता युक्तिमती, अविचलितरूपत्वात् । किं च । असौ संबन्धो वस्तुरूपो वा, अवस्तुरूपो वा; वस्तुरूपोऽपि प्रत्यक्षप्रमाणपरिच्छेद्यो वा भवेत्, अनुमानसंवित्संवेद्यो वा । न तावत्प्रत्यक्षं ताभ्यां कार्यकारणाभ्यां भिन्नस्वभावं संबन्धं गृह्णन्निश्चीयते । नाप्यनुमानेन संबन्धो निर्णीयते, यतोऽनुमानं लिङ्गबलेनोदयमासादयति । न च संबन्धस्य किंचिल्लिङ्गमवलोक्यते । भवतु वा लिङ्गं संबन्धस्य, तथापि तयोः संबन्धः केन प्रमाणेन निर्णीयते, प्रत्यक्षेण, अनुमानेन वा । न तावत्प्रत्यक्षेण । कार्यकारणलक्षणसंबन्धग्रहणाप्रवणेन संबन्धनिश्चयः, यतो द्विष्ठसंबन्धसंवित्तिः, नैकरूपप्रवेदनात् । अनुमानेनापि लिङ्गसंबन्धयोः संबन्धनिश्चयः, किं तेनैवानुमानेन, अनुमानान्तरेण वेति विकल्पद्वयम् । यदि तेनैव, तदा स्फुट एवेतरेतराश्रयलक्षणो दोषो भवन्तमनुबध्नाति । तथाहि । यावदनुमानं न प्रवृत्तं, न तावत्संबन्धावधारणं; यावत्संबन्धो नावधारितः, न तावदनुमानप्रवृत्तिः । अनुमानान्तरेण चेत्, अनवस्थाप्रसङ्गः । तथाहि । अनुमानं लिङ्गग्रहणपुरःसरमेव प्रवर्तते, तस्यापि लिङ्गस्यानुमानान्तरेण संबन्धो निर्णेयः, तदपि लिङ्गं निर्णयपूर्वकमभिधेयमित्याद्यावर्तनादनवस्था धावन्ती निर्लज्जकुट्टिनीवद्दुर्निवारा स्यात् । अथावस्तुरूपः, तर्ह्याकाशकुशेशयवत्प्रमाणाविषयत्वादविद्यमान एव । अथाभिन्नस्वभावोऽसावुच्यते; तर्हि कथं कार्यकारणाभ्यामेव कारणबुद्धिर्भवतीति सुगतमतानुसारिभिरभिधीयमानमिदं वचो भवतः पौरुष-

माभातीति न कश्चित्ताभ्यां व्यतिरिक्तः संबन्धोऽस्तीत्युपरम्यते कार्यकारणभङ्गः ॥ ११ ॥

[ XII ]

## [ अथ सर्वगतात्मवादः ]

अथ वैशेषिकैः सर्वगतत्वमात्मनः साध्यते प्रमाणतः । तथाहि । बुद्ध्यधिकरणं द्रव्यं विभु, नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानत्वात् । यद्यन्नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानं, तत्तद्विभु, यथाकाशम् । तथा च बुद्ध्यधिकरणं द्रव्यम् । तस्माद्विभु । न च बुद्धेर्गुणत्वासिद्धेर्हेतुविशेषणासिद्ध्या[1] हेतोरसिद्धिरभिधातुं शक्या, बुद्धेर्गुणत्वस्यानुमानात्सिद्धेः[2] । तथाहि । गुणो बुद्धिः, प्रतिषिध्यमानद्रव्यकर्मभावे सति सत्तासंबन्धित्वात् । यो यः प्रतिषिध्यमानद्रव्यकर्मभावे सति सत्तासंबन्धी स स गुणः, यथा रूपादिः । तथा च बुद्धिः । तस्माद्गुणः । न चायमसिद्धो हेतुः । तथाहि । एकद्रव्या बुद्धिः, सामान्यविशेषवत्त्वे सत्येकेन्द्रियप्रत्यक्षत्वात् । यद्यत्सामान्यविशेषवत्त्वे सत्येकेन्द्रियप्रत्यक्षं, तत्तदेकद्रव्यं, यथा रूपादि । तथा च बुद्धिः । तस्मादेकद्रव्या । न च "एकेन्द्रियप्रत्यक्षत्वात्" इत्युच्यमाने "आत्मना व्यभिचारः", तस्यैकेन्द्रियप्रत्यक्षत्वे विवादात्[3] । नापि वायुना, तत्रापि तत्प्रत्यक्षत्वस्य विवादास्पदत्वात् । तथापि रूपत्वादिना व्यभिचारः, तन्निवृत्त्यर्थं "सामान्यविशेषवत्त्वे सति" इति विशेषणोपादानम् । न च रूपस्यान्तःकरणग्राह्यतया द्वीन्द्रियग्राह्यता चक्षुरिन्द्रियस्यैव "चक्षुषा रूपं पश्यामि" इति व्यपदेशहेतोस्तत्र करणत्वसिद्धेः, मनसस्त्वान्तरार्थप्रतिपत्तावेवासाधारणत्वात् । अथवैकद्रव्या बुद्धिः, सामान्यविशेषवत्त्वे गुणवत्त्वे च सत्यचाक्षुषप्रत्यक्षत्वात्, शब्दवत् । तथा न कर्म

---

1 A बुद्धेर्गुणत्वासिद्धो हे° 2 A बुद्धिगुणत्वस्या° 3 A °प्रत्यक्षत्वविवादात्

बुद्धिः, संयोगविभागाकारणत्वात् । यद्यत्संयोगविभागाकारणं, तत्तत्कर्म न भवति, यथा रूपादि। तथा च बुद्धिः। तस्मान्न कर्म । तस्मात्सिद्धः प्रतिषिध्यमानद्रव्यकर्मभावो बुद्धेः । न च सत्तासंबन्धित्वमसिद्धं[1] बुद्धेः, तत्र सदितिप्रत्ययोत्पादात् । न च सत्ताभिन्ना न सिद्धा तद्भेदप्रतिपादकप्रमाणसद्भावात्[2] । तथाहि । यस्मिन्भिद्यमानेऽपि यन्न भिद्यते तत्ततोऽर्थान्तरं, यथा भिद्यमाने वस्त्रादावभिद्यमानो देहः । भिद्यमाने च बुद्ध्यादौ न भिद्यते सत्ता, द्रव्यादौ सर्वत्र सदितिप्रत्ययाभिधानदर्शनात्, अन्यथा तदयोगात् । सा च बुद्धिसंबद्धा, ततस्तत्र विशिष्टप्रत्ययप्रतीतेः । तथाहि । यतो यत्र विशिष्टप्रत्ययः स तत्र संबद्धः, यथा दण्डो देवदत्तेन । भवति च बुद्ध्यादौ सत्ता; इतस्तत्प्रत्ययः; ततस्तया संबद्धा भवति । "प्रतिषिध्यमानद्रव्यकर्मत्वात्" इत्युच्यमाने सामान्यादिना व्यभिचारः; तन्निवृत्त्यर्थं "सत्तासंबन्धित्वात्" इति वचनम् । "सत्तासंबन्धित्वात्" इत्युच्यमाने द्रव्यकर्माभ्यामनेकान्तः, तन्निवृत्त्यर्थं "प्रतिषिध्यमानद्रव्यकर्मभावे सति" इति विशेषणम्। तदेवं भवति । अतोऽनुमानाद्बुद्धेर्गुणत्वसिद्धिः । अस्मदाद्युपलभ्यमानत्वं बुद्धेस्तदेकार्थसमवेतानन्तरज्ञानप्रत्यक्षत्वान्नासिद्धम् । नित्यत्वं चात्मनः "अकार्यत्वात्, आकाशवत्" इत्यनुमानप्रसिद्धम्[3] । अतो "नित्यत्वे सति", अस्मदाद्युपलभ्यमानगुणाधिष्ठानापेक्षस्यावृत्तेः ॥ नापि विरुद्धः, विभुन्याकाशेऽस्य वृत्त्युपलम्भात् ॥ नापि बाधितविषयः, प्रत्यक्षागमयोरात्मनि विभुत्वाप्रदर्शकयोरसंभवात् ॥ नापि प्रकरणसमः, प्रकरणचिन्ताप्रवर्तकस्य हेत्वन्तरस्याभावात् । भवति सकलदोषरहितादतो हेतोः सर्वगतात्मसिद्धिः ॥

॥ सर्वगतात्मवादः ॥ १२ ॥

---

1 A सत्तासंबन्धित्वमसंबद्धं 2 A °प्रमाणभावात् 3 B C इत्यनुमानं प्रसिद्धं

[ XIII. ]

## [ अथ सत्कार्यवादभङ्गः ]

इह हि यदभिधीयते सांख्यैः "सदेव समुत्पद्यते कार्यं", तदयुक्तमेव सत्कार्यस्योत्पत्तेरसंभवात् । तथाहि । यत्सत्तन्न केनापि क्रियते, यथा भवन्मतेनैव पुरुषः । सच्चाभ्युपगम्यते कार्यम् । न चैतदसिद्धं, यतः सर्वापि साधनप्रवृत्तिः स्वविषये संशयविपर्यासनिवृत्तिप्रधानाभ्युपगम्यते निश्चयोत्पादिका च । न च सत्कार्यवादपक्षे द्वयमप्युपलक्षयामः । तथाहि । संशयविपर्यासौ बुद्धिमनःस्वभावौ कदाचिच्चैतन्यात्मकौ । ततश्च तेषां नित्यत्वेन संशयविपर्यासयोर्नित्यत्वात्सर्वदावस्थितत्वेन केनापि निवृत्तिः कर्तुं न शक्यते नापि निश्चयोत्पत्तिः, सर्वदावस्थितत्वात्तस्य । ततश्च यदुच्यते "हेतुपञ्चकमसत्कार्यनिषेधद्वारेण सत्कार्यप्रसाधकं, तत्सर्वमयुक्तप्रायं, प्रत्युत स्ववचनविरोध एव केवलम् । तथाहि । निश्चयोत्पत्तये साधनप्रयोगमभिधातुकामेन निश्चयस्यासत उत्पत्तिः कक्षीकृता सत्कार्यमिति प्रतिज्ञायाश्च दत्तो जलाञ्जलिरिति कथं न स्वोक्तवचनव्याघातः । अथेदमभिधीयते । मा भूत्साधनप्रयोगवैफल्यापत्तिरिति निश्चयो भूत एव साधनादुत्पद्यत इति कक्षीक्रियत एव; तर्हि "असदकरणात्" इति हेतुपञ्चकस्यानैकान्तिकता स्ववाचाभ्युपगता । तद्वत्सर्वेषामपि कार्याणामसतामुत्पत्तिः । ततश्च यथासतोऽपि कारणं निश्चयस्य, तथा[1] तन्निष्पत्तये[2] विशिष्टसाधनपरिग्रहे सर्वसाधनाभासाद्यसंभवा विद्यमानशक्तहेतुः शक्यकरणकारणभावाश्च संभवन्ति, तथासत्कार्येऽपि संभवादिति । अथोच्यते । यद्यपि साधनप्रयोगोत्पत्तेः प्रागपि निश्चयसद्भावः, तथापि न साधनानां वैयर्थ्यं, यतोऽसौ साधनाभिव्यक्तिकारणेभ्यो व्यक्तो भवतीति

1 C omits from तथा down to संभवन्ति of l. 24
2 A omits तत्

तस्मादभिव्यक्तये साधनानि व्याप्रियमाणानि कथं हन्तानर्थक्यमापद्यन्त इति तदयुक्तं, व्यक्तेरस्माकमसिद्धत्वात् । तथाहि । व्यक्तिः किं स्वभावातिशयोत्पत्तिः, उत तद्विषयं विज्ञानं, तदुपलम्भावरणक्षयो वा । तत्र न तावत्स्वभावविशेषोत्पत्तिः । तथाहि । असौ स्वभावातिशयो निश्चयरूपादपृथग्भूतो वा स्यात्, पृथग्भूतो वा । तत्र यद्याद्यः[1] कल्पः, तदा तस्य निश्चयरूपवत्सर्वदावस्थितत्वान्नोत्पत्तिर्घटामियर्ति । अथ पृथग्भूतोऽभ्युपगम्यते; नन्वेवमपि तस्यासाविति संबन्धघट्टनं दुर्निवार्यमेवासज्यमानं केन विनिवार्यते । तथाहि । असौ भवन् भवेज्जन्यजनकलक्षणः, आधाराधेयलक्षणो वा । तत्र न तावदाधाराधेयलक्षणः, परस्परमनुपकार्योपकारकयोस्तदसंभवात् । अभ्युपगम्यते चेदुपकारः; ननु सोऽपि व्यतिरिक्त एवाभ्युपगमनीयः, ततश्चानवस्थापत्तेः संबन्धासिद्धिः । अथाव्यतिरिक्तः; तर्हि साधनवैयर्थ्यं निश्चयोत्पत्तावस्याप्युत्पत्तिसिद्धेः[2] । किं च । असावमूर्तोऽमूर्तस्य बाधः प्रसर्पमाणभावादयुक्त एवाधारः, अधोगतिप्रतिषेधस्यैवाधारत्वायोगात्[3] । नापि जन्यजनकलक्षणः, निश्चयलक्षणस्य कारणस्य सदा संनिहितत्वेन नित्यं कार्यजननप्रसङ्गात् । किं च । साधनप्रयोगापेक्षया निश्चयस्यातिशयोत्पादकत्वं न युक्तं; अकिंचित्कारेऽपेक्षायोगादुपकारकल्पनायां पूर्वक एव दोषोऽनवस्था च । अपि च । योऽयमतिशयः पृथग्भूतः क्रियते, स किमसन्, आहोस्वित्सन्निति । तत्रासत्पक्षे प्रागिव हेतूनामनैकान्तिकता, सत्त्वे च साधनवैयर्थ्यम् । तत्राप्यभिव्यक्ताविष्यमाणायां केयमभिव्यक्तिरित्यनवस्था । तस्माद्व्यतिरेकपक्षेऽपि संबन्धाभावाद्रूपातिशयोत्पत्तिर्न युक्ता । नापि तद्विषया ज्ञानोत्पत्तिर्युक्ता, नित्यत्वात्संवित्तेः । तथाहि । सत्कार्यवादिनो भवतः

1 A °द्यं 2 A °त्पक्षावस्याप्युत्पत्तिः सिद्धिः । 3 B °धारत्वयोगात् ।

संवित्तिर्नित्यैवेति किं तस्याः स्यादुत्पाद्यं द्वितीयोपलम्भस्याभावाच्च न तद्विषयज्ञानोत्पत्तिरभिव्यक्तिर्युक्ता, आसर्गप्रलयादेका बुद्धिर्भवत्सिद्धान्ते[1] प्रतिपादनात् । अथेदमभिधीयते "न बुद्धिस्तद्भावा तद्विषया संवित्तिरपि तर्हि मनःस्वभावा"; तदप्यसाधीयः, अर्थान्तरत्वात् । नापि तद्विषयोपलम्भावरणक्षयलक्षणाभिव्यक्तिः, पूर्वोक्तकारणद्वयादेव । तथाहि । यदिदमुपलम्भावरणं तस्याक्षयत्वान्न क्षयः । अथ तिरोभावलक्षणः क्षयः सोऽप्ययुक्तः, पूर्वरूपस्याभावे तिरोभावादन्योपलम्भाभावाच्च नोपलम्भावरण[2]मस्ति, न चासतो युक्तमावरणं, वस्तुविषयत्वात्तस्य । तस्मान्न क्षयो युक्तः । किं च । आवरणमपि नित्यस्वरूपाणां न संभवत्येव । तत्कथं क्षयः । नाप्यावरणं केनचित्क्रियते, नित्यस्वभावत्वात्तस्य[3] । किं च । सत्कार्यवादपक्षे बन्धमोक्षाद्यभावप्रसङ्गो लोकव्यवहारोच्छेदप्रसङ्गश्चानिवार्यः स्यात् । तथाहि । प्रधानपुरुषयोः कैवल्योपलम्भे मोक्षो भवद्भिरिष्यते तत्त्वज्ञानं च सर्वदावस्थितमिति मुक्ताः स्युः सर्वे देहिन इति न बन्धः । मिथ्याज्ञानस्यावस्थितत्वेन सर्वदा सर्वेषां बद्धत्वात्कुतो मोक्षः । तथाहि । लोकोऽपि हिताहितार्थप्राप्तये प्रवर्तमानो हितार्थसर्वदावस्थितेः कथं तत्र सस्पृहः, तदभावे कथं व्यवह्रियत इति सांख्याभिमतः सत्कार्यवादः सिद्धिपदवीं समश्नुते सांख्यसंमतसत्कार्यवादभङ्गः ॥ १३ ॥

[ XIV ]

## [ अथ ज्ञानवादः ]

यत्प्रकाशते तज्ज्ञानं, जडस्य प्रकाशायोगात् । जडं हि वस्त्वव्यतिरिक्तेन प्रकाशते, व्यतिरिक्तेन वा । न तावदव्यतिरिक्तेन, यतो नाव्यतिरिक्तं प्रकाशं बिभ्राणाः स्तम्भ-

1 A °द्धान्त° 2 B °पलम्भाभावत्वेन 3 A नित्यं स्वभावं°

कुम्भादयो भावा जडा भवितुमर्हन्ति । नापि द्वितीयः पक्षः, यतोऽसौ प्रकाश्यसमानकालभावी प्रकाशः, भिन्नकालभावी वा; समानकालस्यापि प्रकाशकत्वं किं प्रतिभासमानत्वात्, आहोस्विद्ग्रहणक्रियाकरणात्, किं वाधाराधेयत्वात्, उत तदाकारत्वात्, तज्जन्यत्वाद्वेति विकल्पाः । न तावत्प्रतिभासमानत्वात्, प्रतिभासस्य मरीचिकाज्ञानेऽपि तुल्यत्वात् । न च तत्र "वैपरीत्यं" इत्यभिधानीयं, यतः कस्य वैपरीत्यं, ज्ञानस्य ज्ञेयस्य वेति विकल्पद्वयम् । ज्ञानस्यापि वैपरीत्यं किं स्वरूपाभावः, अन्यरूपतया वा प्रकाशनम् । स्वरूपाभावोऽपि किं तस्मिन्नेव काले, कालान्तरे वा । न तावत्तस्मिन्नेव काले, तदा तस्य स्पष्टरूपतयानुभूयमानत्वात् । कालान्तरे तु स्वरूपाभावस्य सर्वविज्ञानेषु समानत्वात्सर्वेषां ज्ञानानां वैपरीत्यापत्तिः । अन्यरूपतया प्रकाशनमपि किं ज्ञानं, अज्ञानं वा । तावदज्ञानस्य स्वरूपसत्तापि सिध्यति । ज्ञानमपि किं तेनैव ज्ञानेन, ज्ञानान्तरेण वा । न तावत्तेनैव, यतो न "तदहं मरीचिकाज्ञानं सज्जलरूपतया चकास्मि" इति वेत्ति । नापि ज्ञानान्तरेण, तदा तस्यानुभूयमानत्वात् । ज्ञेयस्यापि वैपरीत्यं किं सत्यत्वाभिमतेन ज्ञानेन ज्ञायते, बाध्येन बाधकेन वेति विकल्पाः । आद्येनापि किं तद्देशादिकमागत्य प्रमेयवैपरीत्यं प्रतीयते, स्वदेशव्यवस्थितेन वा । न तावत्तद्देशाद्यागमनं ज्ञानस्य क्षणक्षयित्वेन संभवति । स्वदेशव्यवस्थितं त्वन्यदेशव्यवस्थितस्य वार्त्तामपि न जानातीति कथं वैपरीत्यमवगच्छेत् । बाध्यमपि किं प्रत्यक्षमनुमानं वा प्रमेयवैपरीत्यप्रत्यायकम् । न तावदध्यक्षं, तस्यातीतदेशादिग्राहकत्वासंभवात् । अथ "स्मरणेनोपनीतोऽतीतदेशादिः पुरोवर्तिधर्मिदेशे क्षणत्वेन व्यवस्थितो लोचनज्ञानं जनयति, तेन वैपरीत्यप्रतीतिः" इति चेत् तदप्यनुपपन्नं, स्मरणोपनी-

तार्थस्य सत्यत्वेन जगददारिद्र्यप्रसङ्गात् । न चैवं, निर्विषयत्वात्तस्य । अथ "प्रत्यक्षविषय एव स्मरणगोचरः" इति चेत्, तन्न[1], तयोरेकविषयत्वेनैकत्वापत्तेः । अथ "तदेव वस्तु परोक्षतया स्मार्तविज्ञानस्य विषयः साक्षाद्रूपतया त्वध्यक्षस्य" इति ब्रूषे । इदमप्यनुपपन्नं, यतः किमिदं परोक्षत्वं वस्तु वा भवेत्, अवस्तु वा । वस्त्वपि प्रत्यक्षेणेक्षितं, अनीक्षितं वा । ईक्षितं चेत्, तयोरेकविषयत्वापत्तिस्तदवस्था । अनीक्षितं चेत्, कथमध्यक्षविषय एव स्मरणग्राह्यः । अथावस्तु परोक्षत्वं; एवं तर्ह्यसत्त्वमेव स्यान्न वैपरीत्यम् । नाप्यनुमानेन, यतोऽनुमानं प्रतिबन्धबलेनोदयति, प्रतिबन्धश्च प्रत्यक्षप्रमाणपरिच्छेद्योऽनुमानसंवित्संवेद्यो वा । अध्यक्षमपि प्रतिबन्धावधारकमेकमनेकं वा । एकमपि क्रमेण यौगपद्येन वा । न तावत्क्रमेण पक्षो ज्यायान्, एकग्रहणानन्तरमेव क्षणक्षयित्वेन क्षीणत्वाद्द्वितीयग्रहणाभावे कुतः संबन्धावधारकत्वम् । नापि यौगपद्येन, तथा तयोरसंभवात् । अनेकपक्षेऽपि लिङ्गग्राहकस्याध्यक्षस्य लिङ्गिनीतरस्य चेतरत्राप्रवृत्तेः कथं द्विष्ठप्रतिबन्धप्रतीतिः । अनुमानेनापि प्रतिग्रहो नाभ्युपगन्तव्यः, अनवस्थेतरेतराश्रयलक्षणदूषणप्रसक्तेः । नापि बाधकं विज्ञानं ज्ञेयवैपरीत्यप्रत्यायकं, यतस्तत्स्वस्यासत्त्वमेव निश्चिनोति नान्यदेशादिसंबन्धिनाम् । नापि ग्रहणक्रियाकरणात्प्रकाशको बाधोऽप्यसौ ग्रहणक्रियां[2] चिद्रूपां वा विधत्ते, अचिद्रूपां वेति विकल्प्यते; चिद्रूपामप्यव्यतिरिक्तां, व्यतिरिक्तां वा । अव्यतिरिक्तपक्षे[3]ऽर्थस्य चिद्रूपत्वापत्त्या जडताहानिः । व्यतिरेकपक्षे तु गृहीतिक्रिया परां गृहीतिक्रियामारचयन्ती पदार्थस्य प्रकाशिका तामन्तरेण वा । प्रथमपक्षेऽनवस्था स्फुटैव । द्वितीये तु बोधस्यापि तथात्वापत्तिरिति ।

1 B omits तत् 2 B inserts तां 3 B अव्यतिरिक्ते पक्षे

अचिद्रूपापि भिन्ना वा, अभिन्ना वा । अभेदे जडार्थकर्तृत्वं विज्ञानस्यासज्यते; न चैतद्युक्तं, तत्र तस्यानधिकारात् । भेदे तु तस्याजडत्वादपरया ग्रहणक्रियया असौ प्रकाशनीया साप्यपरया इत्यनवस्था तदवस्थैव । नापि तदाधेयत्वात्प्रकाशकत्वं, आधाराधेयभावस्यैव विचारभारगौरवासहिष्णुत्वात् । तथाहि । आधारः किं स्थितिकरणात्, अविनाशकरणाद्वेत्यादि । नापि तदाकारत्वात्, यतस्तदाकारं विज्ञानमेवानुभूयते नार्थः । अतस्तदाकारत्वबोधस्यैव व्यवस्थापकम् । अर्थव्यवस्थापकत्वे वा किं क्रमेणार्थं व्यवस्थापयति, यौगपद्येन वा । न तावत्क्रमपक्षः क्षणक्षयित्वेन संभवति । नापि यौगपद्यं, द्वयोरननुभूयमानत्वात् । नापि तज्जन्यत्वात्प्रकाशको बोधः समसमयभाविनोर्जन्यजनकभावासंभवात् । भिन्नकालभाव्यपि बोधोऽर्थात्प्राग्वा भवेत्पश्चाद्वा । न तावत्प्राग्भावी बोधो बोधकः, तदा बोधस्यैव भावात् । नापि पश्चात्, तदार्थस्य विनष्टत्वात्कस्यासौ प्रकाशको भवेत् । इत्थं समानकालभाविनो भिन्नकालस्य वा व्यतिरिक्तबोधस्य प्रकाशकस्यानुपपद्यमानत्वात् "यत्प्रकाशते तत्सुखादिवद्विज्ञानमेव" इति स्थितम् ॥ ज्ञानवादोऽसौ ॥ १४ ॥

[ XV. ]

## [ अथ ज्ञानक्षणिकत्ववादः ]

अथवा यत्प्रकाशते तज्ज्ञानं, जडस्य प्रकाशायोगात् । न चायमसिद्धो हेतुः, यतस्तदा हि स्यादस्य हेतोरसिद्धत्वं यद्यप्रकाशरूपमपि ज्ञानं स्याद्यावन्न खलु केनापि वादिना ज्ञानस्याप्रकाशरूपमिष्टं सर्ववादिनां ज्ञानस्य प्रकाशरूपत्वेनाभ्युपगमात् । नाप्यनैकान्तिकः, विपक्षे प्रकाशस्याभावात् । नापि विरुद्धः, विरुद्धसाधनाभावादेव । तथाहि । विरुद्धो जडोऽर्थः । स च स्वयं प्रकाशते, परतो वा । न तावत्स्वयं, जडत्वादेव । अथ परतः; तदानीं किं ज्ञानात्, अज्ञानाद्वा । यदि ज्ञानात्,

तदानीं व्यतिरिक्तात्, अव्यतिरिक्ताद्वा । यद्यव्यतिरिक्तात्, तदागतमर्थेनाज्ञानात् "ज्ञानं" इत्यायातं सिद्धं नः समीहितम् । अथ व्यतिरिक्तात्, तदा किं तज्जन्यात् अतज्जन्याद्वा । यदि तज्जन्यात्, तदा ज्ञानरूपात्, अज्ञानरूपाद्वा । यदि ज्ञानरूपात्, तदा[1] ज्ञानाद्वैतमेव । अथाज्ञानरूपात्;तदसंगतं; नाज्ञानाज्ज्ञानं भवितुमर्हति, अन्यथा यदि विलक्षणादपि कारणाद्विलक्षणं कार्यं समुत्पद्यते, तदा गोधूमादिभ्योऽपि शाल्यङ्कुरादयः समुत्पद्येरन्, ततश्च सर्वमसमञ्जसं समापनीपद्येत । न चैवम् । अथैवमभिधीयते "विलक्षणादपि गोमयाद्विलक्षणशालूकोत्पत्तिदर्शनात्तदत्राप्येवं भविष्यति" तदप्ययुक्तं, यतो न तत्र वैलक्षण्यं कारणाभावनिबन्धनत्वेन वक्तुं शक्यं, अन्वयव्यतिरेकाभ्यां केवलादपि गोमयाच्छालूकोत्पत्तिदर्शनात् । न च तथा केवलादर्थाज्ज्ञानं केनाप्युत्पत्तिमद्दृश्यत इष्यते वा । अथातज्जन्यात्, तदप्यचारु । अतज्जन्यादपि ज्ञानादर्थो यदि प्रकाशते, तदानीं यथा पुरोवर्तिनः पदार्थाः प्रकाशन्ते तथा कालान्तरदेशान्तरवर्तिनोऽपि प्रकाशेरन्, अतज्जन्यत्वाविशेषात् । अथार्थमन्तरेणार्थकलाकलनविकलमपि ज्ञानं न स्यात्; तदप्ययुक्तं, यतः स्वांशग्रहणे ह्यन्तःसंवेदनं व्याप्रियमाणमनुभूयते । तथा बहिरप्यर्थमन्तरेण स्वप्नदशायां नानाप्रकारं विज्ञानं संजायमानमनुभूयत एव; न चानुभूयमानस्य वस्तुनोऽभावः शक्यते वक्तुं, नीलादिज्ञाने नीलाद्याकारस्य च वेद्यमानत्वात् । तदप्यसंगतं, यतो वेद्यवेदकाकारविकलस्य सकलविकल्पगोचरातीतस्य निर्विकल्पसंवेदनस्यैव संवेद्यमानत्वात्; ग्राह्यग्राहकाकारः पुनरनादिकालालीनवासनाबलेनोत्पन्नत्वात् । तथा चोक्तम् । "सर्वमालंभनं भ्रान्तं" । किं च । बहिःप्रकाशस्य तद्ग्राह्यार्थविचाराक्षम-

1 B omits ज्ञानरूपात्, अज्ञानरूपाद्वा । यदि ज्ञानरूपात्, तदा

तयोपप्लुतत्वात् । तथाहि । अर्थोऽवयविरूपः, अवयवरूपो वा भवेत्, गत्यन्तराभावात् । न तावदेकदेशवदवयविरूपो[1] विचारं क्षमते, अवयवविरहेऽवयवित्वायोगात्, तेषु तद्वृत्तिविकल्पानुपपत्तेः । तथाहि । अवयवेष्ववयवी वर्तमानः किमेकदेशेन वर्तते, सामस्त्येन वा । न तावदेकदेशेन, तस्य स्वयं निरवयवित्वादेव वृत्तिनिमित्तमंशान्तरकल्पनेंऽशान्तरवृत्तावप्यंशान्तरप्रसङ्गः, तथा चानवस्था । न च सामस्त्येन प्रत्यवयवपरिसमाप्तरूपतयावस्थितावयवित्वप्रसङ्गाद्भेदपक्षे । दोषोऽयमभेदे नास्तीति चेत्, तन्न । तत्राप्यवयवमात्रमवयविमात्रं च स्यादितरेतराव्यतिरिक्तत्वात्, इतरेतरस्वरूपवत् । किं च । समस्तावयवव्यापिनोऽवयविनोऽभ्युपगमे पटादेरेकदेशे[2] रागारागकम्पाकम्पादीनि दुर्निवाराणि स्युः, एकस्य रागादिविरुद्धधर्माध्यासायोगात् । नाप्यवयवरूपोऽर्थो विचारगोचरचारी करचरणशिरोवादिनामवयवानां स्वावयवापेक्षयावयविरूपतया तद्रूपेणैवापास्तत्वात् । अथ परमाणूनां निरंशतयावयवत्वमुपपद्येतेति चेत्, तदप्ययुक्तं, तेषामपि दिक्षट्कसंबन्धेन षडंशतापत्तेः[3], अन्यथावस्थानाभावात् । ततश्चार्थविरहात्तदुन्मुखो ग्राह्याकारोऽलीकः, तदलीकतायां ग्राहकाकारोऽप्यलीक एव; ग्राह्याभावे ग्राहकायोगात्तदपेक्षयैव तदुपस्थितिः; इत्थं च ग्राह्यग्राहकाकाराभावे ज्ञानाद्वैतमेवावशिष्यते, तस्य सर्वत्राव्यभिचरितरूपत्वात् । तस्मात्तदेव पारमार्थिकमिति स्थितम् ॥ यत्तावदुक्तं "यत्प्रकाशते तज्ज्ञानं" इति, तत्तावद्विचारयामः । किं स्वयमेव परनिरपेक्षमात्मानं प्रकाशयति, सापेक्षं वा । तत्र यद्याद्यः पक्षः कक्षीकारपूर्वीकारेण प्रतिपद्यते, तदयुक्तं, स्वात्मनि क्रियाविरोधात् । न ह्यत्यन्तकुशाग्रीयबुद्धिमानपि तेनैवाङ्गुल्यग्रेण तदेवाङ्गुल्यग्रं स्पृशति, स्पृशतां वा दुर्बलं वादिनं दृष्ट्वाभ्युपगम्यापि ब्रूमहे ।

1 A omits एकदेशवत् 2 A पदादे° 3 A °तापातः

एकस्यैव प्रकाशकप्रकाश्यभावः[1] कथमभ्युपगम्यते। तथाहि। प्रकाशयतीति प्रकाशकः, प्रकाश्यत इति प्रकाश्यः। न चैतयोरैकात्म्यं, विरोधव्याघ्राघ्रातत्वात् । अथ द्वितीयः पक्षः[2]; सोऽप्यनुपपन्नः। सतोऽन्यस्य ज्ञानमज्ञानं वा। तत्र यदि तावज्ज्ञानं, तदा ज्ञानं ज्ञानान्तरवेद्यमित्यायातं, एवं च स्वदर्शनव्याघातः स्वसंवेदनानभ्युपगमादिति । अथ "अज्ञानं" इति द्वितीयः पक्षः; सोऽप्यनुपपन्नः, यतस्तदपि वस्तुप्रतिषेधनादित्युच्यते, आहोस्वित् सदृशप्रतिपत्त्या वा। तत्र यदि तावदभावः, तदयुक्तं, अभावस्याकिंचित्करत्वात्किंचित्करत्वेऽभावरूपविरोधात् । तस्मान्नाभावापेक्षं प्रकाशकत्वम्। अथ द्वितीयः पक्षः; तत्रापि किं ज्ञानापेक्षया सदृशं ज्ञानान्तरं गृह्यते, आहोस्विज्ज्ञानवस्तुव्यतिरिक्तं वस्त्वन्तरम्। तत्र यदि तावज्ज्ञानान्तरं[3], भ्रान्तं, अभ्रान्तं वा। तत्र यदि भ्रान्तं, तदा तदपेक्षं प्रकाशकत्वमयुक्तं, भ्रान्तत्वादेव। अथ द्वितीयः पक्षः; तदा स्वदर्शनव्याघात इति पूर्वमेवावर्तते। अथ ज्ञानव्यतिरिक्तं वस्त्वन्तरस्वरूपमेव गृह्यते, तदा हेतुर्विरुद्धः, विरुद्धसाधनात्। तस्मात्स्वरूपासिद्धो हेतुः, प्रत्यक्षानुमानबाधितत्वात् कालात्ययापदिष्टत्वात्। तथाहि। प्रत्यक्षेण जडमनुभूयते, अनुमानेन वोभयरूपम्। यदप्युक्तं "जडं हि वस्तु व्यतिरिक्तेन प्रकाशेन प्रकाशत इत्यत्राव्यतिरिक्तं ज्ञानं बिभ्राणाः स्तम्भेभकुम्भाम्भोरुहादयः पदार्था न प्रतीयन्ते" इति, तदप्यसमीचीनं, यतो भवतैव प्रतीयन्ते, अव्यतिरेकाङ्गीकारात्, अथ मया न प्रतीयन्ते। अतः कारणादिदमुच्यते। तदास्मदभ्युपगमः प्रमाणं, अप्रमाणं वा। यदि प्रमाणं, तदा स्वदर्शनतिरस्कारद्वारेणास्मद्दर्शनं किं नाभ्युपगतं भवति। अथोक्तदो-

1 A °प्रकाश्यकभावः 2 B द्वितीयपक्षः 3 B तत्र यदि तावत्तदा तत्रापि ज्ञानान्तरं ज्ञानान्तरं

षाद्बिभ्यता भवता[1] द्वितीयपक्षोऽभ्युपगम्यते; तदोक्तमेव दूषणमित्यत्रोपतिष्ठते। यदप्युक्तं "व्यतिरिक्तज्ञानप्रकाशकत्वपक्षे प्रतिभासमानत्वात्प्रकाशकमित्यत्र मरीचिकाज्ञानेऽपि प्रकाशस्य तुल्यत्वात्" इति, तदप्यनुचितं, प्रत्यनीकोपस्थापकप्रमाणेन बाध्यमानत्वात् "प्रतिभास एवालीकः" इति साधनविकलो दृष्टान्तः। यदप्युक्तं[2] "ज्ञानस्य वैपरीत्यं ज्ञेयस्य वा" इत्यादि, तदप्यनुपपन्नं, यतो ज्ञेयवैपरीत्यं नाभ्युपगतमेवेत्यसदुपालम्भ एव ज्ञानस्य वैपरीत्यमुपगतमेव, तच्च ज्ञानान्तरेण बाधकेन व्यवस्थाप्यत इति न तत्पक्षभावी दोषः संगतिमङ्गति। यदप्युक्तं "ग्रहणक्रियाकरणादित्यचिद्रूपा[3] व्यतिरिक्ता क्रिया" इति, तदनभ्युपगमादेव निरुक्तम्। व्यतिरिक्तापि चिद्रूपा नाभ्युपगम्यते, अचिद्रूपाभ्युपगमे तत्कारणाज्ज्ञानं प्रकाशकं क्रियायाः, ततश्च नानवस्था[4], क्रियान्तरापेक्षया। तदाधेयपक्षस्तु न संभवत्येव, ज्ञानस्यात्मसमवेतत्वात्। तदाकारपक्षोऽप्यसंभवान्, ज्ञानस्य निराकारत्वेनाभ्युपगमादिति तज्जन्याच्च। यच्च तत्र दूषणमदायि यदत्राक्षणिकक्रमपक्षे न यच्छतीत्युपरम्यते॥ १५॥

[ XVI. ]

## [ अथ बौद्धहेतुखण्डनम् ]

यदिदमभ्यधायि शौद्धोदनशिष्यकैः "स्वभावकार्यानुपलम्भलक्षणस्त्रिधैव हेतुः" इति, तदयुक्तं, यतस्त्रिधैव तदैव युज्यते यदा हेत्वन्तराभावः केनापि प्रमाणेन निश्चितो भवेत्, यतः प्रतियोग्यभावेऽतिनिर्णयाव्यभिचारित्वाद्भावेषु सावधारणनिर्णयस्य। यदुक्तम्।

---

1 A omits 2 B C तद° 3 A ग्रहणकरणादि° 4 B C omit क्रिया" इति—ततश्च नानवस्था

अयमेवेति यो ह्येष भावे भवति निर्णयः ।
नैष वस्त्वन्तराभावसंवित्त्यनुगमादृते ॥

अथोच्यते । हेत्वन्तराभावः प्रत्यक्षेणैवेक्ष्यते । तदयुक्तं, यतः प्रत्यक्षं विविक्तक्षणक्षयिपरमाणुलक्षणस्वलक्षणविषयमेवाभिधीयते, न च हेत्वन्तराभावस्तथाभूतोऽभिवर्ण्यते । तथाहि । यद्यसदलक्षणो वस्त्वात्माभावः संपरिकल्पते, तदा तस्येन्द्रियसंनिकर्षाभावात्प्रत्यक्षस्य तद्विषयविरोधितेति । यदुक्तम् ।

न तावदिन्द्रियेणैषा नास्तीत्युत्पद्यते मतिः ।
भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि ॥

अथाभिधीयते । सर्वशक्तिविरहलक्षणोऽभावो ननु सोऽपि वस्तुविषयिणः प्रत्यक्षस्य विषय इत्यादातुं न शक्यते । तथा "अनुमानं तद्ग्राहकं भविष्यति" इत्यपि न लपनीयं, यतस्त्रिविधलिङ्गसमाश्रयमेव वर्ण्यते तदिति तत्र स्वभावकार्यहेतू विधिसाधकाविति न तदाश्रयं सहेत्वन्तराभावं कर्तुं पारयति । अथोच्यते । यद्यपि कार्यस्वभावहेतुसमुत्थं हेत्वन्तराभावं कर्तुं न शक्नोति, तथाप्यनुपलब्धिसमुत्थं हेत्वन्तराभावसाधनाय भविष्यति । तदप्यसमीचीनं, यतः सापि चतुर्धा स्थूलभेदापेक्षया[1] समुपवर्ण्यते, स्वभावानुपलब्धिः, कारणानुपलब्धिः, व्यापकानुपलब्धिः, विरुद्धविधिश्चेति । तत्र स्वभावानुपलब्धिर्हेत्वन्तराभावनिराकरणाय तदैव प्रभवति यदैकज्ञानसंसर्गिणस्तुल्ययोग्यतारूपस्य नोपलब्धिरूपा भवति न च हेत्वन्तरमत्यन्तमसत्तथोपगतं तथेति । भवतु वा स्वभावानुपलब्धिर्हेत्वन्तराभावसाधनाय, परं देशनैयत्येन सा स्यादित्यतोऽभ्युपगमक्षतिः । अथ यद्यपि स्वभावानुपलब्धिर्हेत्वन्तराभावसाधनाय न प्रवर्तते, तथापि कारणव्यापकानुपलब्धी भवि-

1 A स्थूलापेक्षया

ष्यतः । तदप्ययुक्तं, यतः सिद्धे कार्यकारणव्याप्यव्यापकभावे भवतो न चात्यन्तयोग्यस्य[1] हेत्वन्तराभावस्य कार्यकारणभावो व्याप्यव्यापकभावो वा समस्ति, भवतो वा कारणव्यापकानुपलब्धी तथापि देशनैयत्येन हेत्वन्तराभाव इति । न च तथाभ्युपगम्यते । अथ विरुद्धोपलब्धिः; साप्यघटमानैव, यतो भवतो जायमानस्य प्रबन्धेनान्यसद्भावेऽभावाद्विरोधगतिः । न चात्यन्तासंभविनः प्रकारोऽयं भवति, अभ्युपगमे वा देशनैयत्येनैव स्यादिति । तत्र च प्रागुक्तो दोष इति कथं त्रिविधैवेत्यवधारणं घटां प्राञ्चति ॥ १६ ॥

[ XVII. ]

## [ अथ वाच्यवाचकसंबन्धः ]

यद्येनाप्रतिबद्धस्वभावं न तत्तस्य गमकं, यथा रजोराज्यादिः पदार्थो धूमध्वजस्य । अप्रतिबद्धस्वभावश्च शब्दोऽर्थेन । न चायमसिद्धो हेतुः । तथाहि । असौ संबन्धो भवन् तादात्म्यलक्षणः, तदुत्पत्तिलक्षणो[2] वा, आधाराधेयलक्षणः, समवायलक्षणः, वाच्यवाचकलक्षणो वेति विकल्पाः । तत्र न तावत्तादात्म्यलक्षणः, यतस्तादात्म्ये हि शब्दार्थयोः शब्दो वा स्यादर्थो वा, न द्वयम् । तथा[3] शब्दार्थयोस्तादात्म्ये क्षुरिकामोदकादिशब्दोच्चारणे मुखपाटनपूरणप्रसङ्गः । न च दृश्यते । नापि तदुत्पत्तिलक्षणः, यतः किं शब्दादर्थोत्पत्तिः, अर्थाद्वा शब्दोत्पत्तिः । यदि शब्दादर्थोत्पत्तिः, तदा विश्वमदरिद्रं स्यात्, हिरण्यशब्दसमुच्चारणादेव तदुत्पत्तेः । नाप्यर्थाच्छब्दोत्पत्तिः, ताल्वादिकारणकलापादेव तदुत्पत्तिदर्शनात् । नाप्याधाराधेयलक्षणः, तस्याप्यघटनात्, यतः स आधारः स्थितिकरणात्, अविनाशकरणाद्वा । यदि स्थितिकरणात्, तदा

1 A ° त्यन्तयोपगतस्य 2 B C omit 3 B C omit

साधारस्थितिस्ततः[1] स्थाप्याद्भिन्ना क्रियते, अभिन्ना वा। यद्यभिन्ना, तदा स्थाप्यमेव कृतं, तच्च स्वकारणकलापादेव सिद्धं; किं तत्राधारेण क्रियते। अथ भिन्ना; तदाधेयस्य न किंचित्कृतं स्यात्[2]। अथ तत्संबन्धिनी स्थितिर्जन्यते; ननु तत्संबन्धो जन्यजनकलक्षणः, आधाराधेयलक्षणो वा। तत्र यदि जन्यजनकलक्षणः, तदाधारेण भिन्ना स्थितिर्जन्यते; आधेयस्य किमायातम् । अथाधाराधेयलक्षणः; तर्ह्याधारः किं स्थितिकारणादविनाशकरणाद्वेति पुनस्तदेवानुवर्तते। नाप्यविनाशकरणात्, अविनाशो हि विनश्वरस्वभावानां भावानां, अविनश्वरभावानां वा। न तावदविनश्वरस्वभावानां, यतो येऽविनश्वरस्वभावा भावास्तेषामविनश्वरत्वं स्वकारणकलापादेव सिद्धं, किं तत्राधारेण क्रियते । अथ विनश्वरस्वभावाः; तदप्ययुक्तं, यतो ये विनश्वरस्वभावा भावास्तेषां[3] विनश्वरतायाः पुरंदरशतैरप्यन्यथाकर्तुमशक्यत्वात् । अपि नाम भावाः स्वयं न भवेयुः। न पुनर्मार्यमाणा अपि स्वं स्वभावं परित्यज्यास्वं स्वभावं स्वीकुर्युः। नापि समवायलक्षणः, तस्याविद्यमानत्वात्। तथाहि । समवायोऽपृथग्भूतानां भावानामुपवर्ण्यते। सा चापृथक्सिद्धिः किं देशैकत्वं कालैकत्वं स्वरूपैकत्वं वेति विकल्पाः। न तावद्देशैकत्वं, यतः पटस्य देशास्तन्तवस्तन्तूनां स्वांशाः । अतः कथं देशैकत्वम्। अथैकाकाशदेशावस्थितत्वाद्देशैकत्वमेकदेशत्वमुच्यते; सर्वपदार्थानामेकाकाशदेशावस्थितत्वादेकत्वापत्तिः । नापि कालैकत्वं, तन्तुकाले पटस्याविद्यमानत्वात्। नापि स्वभावैकत्वं, यतः स्वभावैकत्व एकमेव वस्तु स्यादिति न कश्चित्समवायः। नापि वाच्यवाचकभावः, यतो वाच्यं किमर्थस्वलक्षणं[4], अर्थसामान्यं वा द्वयी गतिः। न तावत्स्वलक्षणं,

---

1 A omits साधार-  2 B C omit the whole sentnce
3 B C omit भावास्  4 B C °स्वभावलक्षणं

यतस्तस्य प्रथमे क्षणे निरीक्षणं, द्वितीये तदध्यवसायः, तृतीये यावच्छब्देन वक्तुमारभ्यते तावत्तस्य क्षणक्षयित्वेन विनष्टत्वात्कथं वाच्यरूपता । नापि सामान्यं, तस्याविद्यमानत्वात् । तथाहि । यत्प्रमाणगोचरचारितां नाचरति न तत्सद्व्यवहृतिपथमवतरति, यथा व्योमारविन्दम् । नाचरति च प्रमाणगोचरचारितां सामान्यम् । न चायमसिद्धो हेतुः । तथाहि । तत्सामान्यं प्रत्यक्षप्रमाणपरिच्छेद्यं वा स्यात्, अनुमानसंवित्संवेद्यं वा । न तावदाद्यः पक्षः, यतः प्रत्यक्षस्य पुरोवर्तिव्यक्तिजन्मता,सामान्यस्य सकलत्रैलोक्योदरविवरवर्तिव्यक्तिव्याप्यस्वरूपता;तथाभूतस्य प्रत्यक्षेण कथमीक्षणं; तदीक्षणेन सर्वज्ञतापत्तिः । तथा तत्सामान्यं व्यक्तिभ्यो भिन्नं, अभिन्नं वा । यद्यभिन्नं, तदा किं तासु व्यक्तिषूत्पद्यमानासूत्पद्यते व्यक्त्यन्तराद्वा गच्छति व्यक्तिशून्य एव वा देशेऽवतिष्ठते । तथा चोक्तम् ।

व्यक्तिजन्मन्यजाता चेदागता नाश्रयान्तरात् ।
तच्छून्ये न स्थिता देशे सा तया संगता कथम् ॥ १ ॥
व्यक्तिनाशे न चेन्नष्टा गता व्यक्त्यन्तरं न च ।
तच्छून्ये न स्थिता देशे सा जातिः क्वेति कथ्यताम्॥२॥

तत्र यदि व्यक्त्या सह जन्मेष्यते, तदा नित्यत्वाभ्युपगमक्षतिः । द्वितीयपक्षे तु सक्रियत्वेन निष्क्रियत्वाभ्युपगमो विरुध्यते । तृतीयपक्षस्तु, सदैव व्यक्त्याधारत्वाभ्युपगमान्न संभवति । तथा विनाशविकल्पा अप्यनेनैव युक्तिकलापेन निरस्तावतारा द्रष्टव्याः । अथ भिन्नं सामान्यमनुगताकारं वा स्यात्, व्यावृत्ताकारं वा । यदि व्यावृत्ताकारं, तदा व्यक्तिरूपस्यैव व्यावृत्तत्वाद्व्यक्तिस्वभावतैव तस्य न सामान्यरूपता । अथानुगताकारं; तदा सोऽनुगमः स्वरूपे, पररूपे वा । न तावत्स्वरूपे, तत्रानुगमाभावात् । न हि सुशिक्षितोऽपि बटुः स्वं स्कन्धमधिरोढुं समर्थः ।

नापि पररूपे, यतः पररूपानुगमः किं तादात्म्यं, तत्समवायो वा । न तावत्तादात्म्यं, व्यतिरेकाङ्गीकारात्[1] । नापि समवायः, सामान्यस्य समवायादत्यन्तव्यतिरिक्तत्वे नाभ्युपगमात् । अथ प्रमाणान्तरं सामान्यसाधकं विद्यते । ततो वाच्यरूपता भविष्यति । तथाहि । यदबाधितबोधगोचरचारि तत्समस्तं समस्ति, यथा स्तम्भेभकुम्भादिकदम्बकम् । अबाधितबोधगोचरचारि च सामान्यमिति, अस्य सामान्यसाधकस्य हेतोर्विद्यमानत्वात्कथं नास्ति सामान्यम् । इदमप्ययुक्तं, अस्य हेतोर्वृत्त्यादिविकल्पैर्बाध्यमानत्वात् । तथाहि । तत्सामान्यं तासु व्यक्तिष्वेकदेशेन वा वर्तते, सामस्त्येन वा; एकदेशेनापि किं येनैवांशेनैकस्यां व्यक्तौ वर्तते तेनैव द्वितीयस्यामपि, अंशान्तरेण वा । यदि तेनैव, तदैकांशेन सर्वव्यक्तीनां व्याप्तत्वात्पिण्डरूपता । अथांशान्तरेण; तदा खण्डीभूतत्वात्सामान्यस्य निःसामान्यापत्तिः । अथ सामस्त्येन; तदैकस्यामेव व्यक्तौ परिनिष्ठितत्वाद्व्यक्त्यन्तराणि सामान्यशून्यानि प्राप्नुवन्ति । तथा तत्सामान्यमसमानरूपासु व्यक्तिषु वर्तते, समानरूपासु वा । यद्यसमानरूपासु, तर्हि गोत्वसामान्यं यथा गोषु वर्तते, तथा महिष्यादिष्वपि वर्तेत, विशेषाभावात् । अथ समानरूपासु; तदा किं तासां सामान्यरूपता स्वरूपेण, सामान्येन वा । यदि स्वरूपेण, तदा सामान्येन किं कर्तव्यम् । अथ सामान्येन क्रियते; किं तेनैव, सामान्यान्तरेण वा । यदि तेनैव, तदा स्फुट एवेतरेतराश्रयदोषः । अथ सामान्यान्तरेण[2]; तदा तदपि तासु समानरूपास्वसमानरूपासु वेत्याद्यनुवर्तनयानवस्थागच्छतीति तद्भयात्तावत्समानरूपता स्वरू-

---

1 A न तावादत्तात्म्याङ्गव्यतिरे का० 2 A omits तदा स्फुट एवेतरेतराश्रयदोषः । अथ सामान्यान्तरेण

पेणाभ्युपगन्तव्या; तस्यां स्वरूपसिद्धायां सामान्येन किं कर्तव्यमिति प्रतिबन्धासिद्धेर्नासिद्धत्वम्। नाप्यनैकान्तिकत्वं, यतो यदि प्रतिबन्धमन्तरेणापि गमकत्वं भवेत्, तदा स्यादनैकान्तिकत्वम्। तच्च न, अतिप्रसङ्गात्। तथाहि। प्रतिबन्धमन्तरेणापि गमकत्वं यत्किंचिद्यतः कुतश्चिद्गम्यते। न चैवम्। तन्नानैकान्तिकत्वम्। नापि विरुद्धत्वं, सपक्ष एव भावात्॥

स्वपक्षे प्रतिष्ठां[1] कुर्वद्भिः सद्भिरस्माभिरिदमुदीर्यते। यत्तावत् "शब्दोऽर्थस्य गमको न भवति" इति साध्ये "यद्येन" इत्यनुमानमुपन्यस्तं, तत्राप्रतिबद्धस्वभावत्वलक्षणो हेतुरसिद्धः। तथाहि। शब्दोऽर्थप्रणयनार्थं प्रयुज्यते, उच्चरिताच्च शब्दादर्थप्रतीतिरुपलभ्यते। सा च संबन्धनिबन्धना वक्तव्या। अन्यथा, यतः कुतश्चिच्छब्दाद्यस्य कस्यचिदर्थस्य प्रतीतिः स्यात्, न नियतान्नियतस्य, तस्मात्संबन्धोऽङ्गीकर्तव्यः, स च वाच्यवाचकभावलक्षण एव, संबन्धत्रयस्य यथोक्तदूषणाघ्रातत्वात्। यच्चाभिहितं "अर्थस्वलक्षणं क्षणिकत्वाद्वाच्यं न संभवति" इति, तदसंगतं, सहेतुकानां घटादीनां मुद्गरादिव्यापारानन्तरं विनाशोपलब्धेः कियत्कालावस्थायित्वस्य व्यवस्थापितत्वात्। इतरथोत्पादानन्तरमेव विनाशे जगच्छून्यं स्यात्, निर्हेतुकानां च व्योमादीनां सर्वदाविद्यमानत्वात्स्वलक्षणस्य वाच्यत्वम्। यच्चोक्तं "सामान्यं प्रमाणगोचरातिक्रान्तत्वाद्वाच्यं न संभवति" इति, तन्न, यतः शब्दोल्लेखशून्येऽपि निर्विकल्पकेऽनुगतं रूपं प्रतिभासते कथम्। अन्यथा दाक्षिणात्यस्याविज्ञातेऽपि वाचक उष्ट्रपरंपरां पश्यतोऽनुगतरूपप्रतिपत्तिः स्यात्। तथा सविकल्पेऽपि सामान्यं प्रतिभासते। तथाहि। "अनयोः सादृश्यमेषां सारूप्यं," "सोऽनेन सदृशः" इत्यादि सविकल्पकं ज्ञानमप्रतिपन्नसामान्यस्य नोपपद्यते,

---

1 A स्वपक्षप्रति०

"अप्रतिपन्नघटस्य घटोऽयं" इति ज्ञानवत् । तस्मात्प्रत्यक्षेण सामान्यं प्रतीयते । अनुमानतोऽपि, तत्पूर्वकत्वात्तस्य । न चेदं ज्ञानं निर्हेतुकं, कादाचित्कत्वात् । नापि तत्पिण्डमात्रनिबन्धनं, पिण्डानां व्यावृत्तत्वात् । यदि चेदं पिण्डमात्रनिबन्धनं स्यात्, तदानीं कर्कादिष्वपि गौर्गौरित्युल्लेखेनोत्पद्यते, पिण्डरूपतायास्तेष्वप्यविशेषात् । न च "वाहदोहाद्यर्थक्रियानिबन्धनोऽयं" इति वाच्यं, तदभावेऽपि वत्सादौ गोबुद्धिप्रवृत्तेः, महिष्यादौ तत्सद्भावेऽपि[1] चाप्रवृत्तेः[2] । न च बाधितोऽयं प्रत्ययः, सर्वत्र सर्वप्रमातॄणामनुगताकारस्योपलब्धेः । नापि दुष्टकारणप्रभवः, काचकामलाद्यशेषचाक्षुषदोषानुपप्लुतविशालपक्ष्मलधवललोललोचनोत्पलयुगलशालिनामप्यनुस्यूताकारस्य प्रभासनात् । तस्मादनुगतप्रत्ययनिमित्तत्वात्सामान्यस्य सद्भावः सिद्धः, तत्सिद्धौ च सामान्यस्वलक्षणयोर्वाच्यत्वं शब्दस्य च वाचकत्वमिति स्फुट एव शब्दार्थयोर्वाच्यवाचकलक्षणसंबन्धो[3] जाघटीति कथं नासिद्धत्वं हेतोरिति ॥ १७ ॥

[ XVIII ]

## [ अथ वाच्यवाचकसंबन्धखण्डनम् ]

अत्रोत्तरयामः । यत्तावदुक्तं "सहेतुकविनाशबलाद्धटादीनां कियत्कालावस्थायित्वं," तदसमीचीनं, विनाशहेतोरपि विचार्यमाणस्यासंभवात् । तथाहि । विनाशहेतुभिर्विनाशो विधीयमानो ऽविनश्वरस्वभावानां भावानां विधीयते, विनश्वरस्वभावानां वेति भागीरथीविपुलपुलिनावतरच्चक्रवाकद्वयमिव विकल्पयुगलममलमवतारमाचरयति । तत्र न तावदविनश्वरस्वभावानां, यतो येऽविनश्वरस्वभावास्तेषां विनश्वरस्वभावत्वस्य पुरंदरशतैरपि कर्तुमशक्य-

---

1 A omits तत् 2 A वा० 3 A रमारचयति

त्वात् । अपि नाम भावाः स्वयं न भवेयुः । न पुनर्मार्यमाणा अपि स्वं स्वभावं परित्यज्य स्वभावान्तरमुररीकुर्युः। नापि विनश्वरस्वभावानां, यतो ये विनश्वरस्वभावास्तेषां स्वहेतुकलापादेव तथाभूतानां समुद्भूतत्वाद्विनाशहेतुभिः किं कर्तव्यम् । तस्मान्न सहेतुकविनाशबलात्कियत्कालावस्थायित्वं, भावानां क्षणिकत्वप्रसाधकानुमानसद्भावात् । तथाहि । यद्यथा प्रतिभासते तत्तथैवाङ्गीकर्तव्यं[1], यथा निर्दोषनयनप्रभवदर्शने प्रतिभासमानं नीलं नीलरूपतया चकास्ति क्षणिकत्वाध्यासिताः सर्वार्थमात्रा इत्यमुतोऽनुमानाद्भावानां क्षणिकत्वं, तस्मिंश्च क्षणिकत्वे न स्वलक्षणस्य वाच्यत्वं नापि सामान्यस्य, तस्याविद्यमानत्वात् । यद्यपि च प्रत्यक्षादिप्रमाणेन तत्सत्त्वं व्यवस्थापितं, तथापि तस्य वृत्त्यादिविकल्पैर्बाध्यमानत्वादिति नास्ति शब्दार्थयोर्वाच्यवाचकलक्षणः संबन्ध इति स्थितम् ॥ १८ ॥

[XIX]

## [ अथ सामान्यनिराकरणम् ]

इह हि नैयायिकमीमांसकादयो नित्यं व्यापकं गोत्वादिसामान्यमुपगच्छन्ति । तच्च न प्रेक्षाक्षुण्णमानसैर्विचार्यमाणं सत्तामासादयति । तथाहि । तदभ्युपगम्यमानं सप्रमाणकमभ्युपगम्यते, निःप्रमाणकं वा । यदि निःप्रमाणकमिति पक्षः, स न युक्तः, प्रमाणमन्तरेण व्यवस्थाया अभावात्, अन्यथा खरविषाणवन्ध्यास्तनन्धयादयोऽपि सद्व्यवहृतिपथमवतरेयुः । अथ "सप्रमाणकं" इति पक्षः; सोऽपि न युक्तः, यतस्तद्ग्राहकं प्रमाणं प्रत्यक्षं वा भवेत्, अनुमानं वा; प्रत्यक्षमपि निर्विकल्पकं, सविकल्पकं वा । तत्र यदि "निर्विकल्पकं" इति पक्षः, स न संगतः शाबलेयादिव्यतिरेकेण सामान्यस्यानुगताकारस्यापरस्याक्षजप्रत्यये[2] प्रति-

1 A omits तस्मान्न सहेतुकविनाश॰ तत्तथैवाङ्गीकर्तव्यं 2 A omits अपरस्य

भासाभावात् । न ह्यध्यक्षव्यापारेण शाबलेयादिषु व्यवस्थितं कण्ठे गुण इव भिन्नमनुगताकारं सामान्यं केनचिल्लक्ष्यते । अथ "सविकल्पकं तद्ग्राहकं" इति पक्षः; सोऽप्ययुक्तः । गौर्गौरिति विकल्पज्ञानेनापि त एव समानाकाराः शाबलेयादयो बहिर्व्यवस्थिता अवसीयन्ते । अन्तश्च शब्दोल्लेखो न पुनस्तद्भिन्नमपरं गोत्वम् । अथ "अनुमानं" इति पक्षः कक्षीक्रियते; सोऽपि न चारुत्वमवलम्बते, यतस्तद्ग्राहकमनुमानमभ्युपगम्यमानं किंस्वरूपमिति वक्तव्यम् । अथ किमत्रोच्यते । विद्यत एव सकललोकप्रसिद्धमनुमानं तद्ग्राहकम् । तथाहि । व्यावृत्तेषु खण्डमुण्डशाबलेयादिष्वनुगताकारस्तद्व्यतिरिक्तानुगतनिमित्तनिबन्धनो व्यावृत्तेष्वनुगताकारप्रत्ययत्वात् । यो यो व्यावृत्तेष्वनुगताकारप्रत्ययः स स तद्व्यतिरिक्तानुगतनि[1]बन्धनः, यथा चर्मचीरकम्बलेषु नीलमिति प्रत्ययः । तथा चायं शाबलेयादिषु गौर्गौरिति प्रत्ययः । तस्मात्तद्व्यतिरिक्तानुगतनिमित्तनिबन्धनं इति नैतत्साधीयः, सामान्यस्यानुगतप्रत्ययहेतुत्वेन प्रमाणतो निर्णयाभावात् । तथाहि । अनुगताकारस्य ज्ञानस्य निर्निमित्तस्यासंभवात्केनचिन्निमित्तेन भाव्यमित्येतावन्मात्रं तिष्ठति । तच्च सामान्यमन्यद्वा न निश्चेतुं शक्यते । किं च । कार्यान्वयव्यतिरेकाकाराभ्यां[2] कारणस्यावधारणं, पिण्डानां च विशेषप्रत्ययोत्पत्तौ ताभ्यां सामर्थ्यं सिद्धम् । ततोऽनुगतप्रत्ययेऽपि तेषामेव सामर्थ्यपरिकल्पनं, न सामान्यस्य, तस्य क्वचिदपि सामर्थ्यानवधारणात् । तथाहि । पिण्डसद्भावेऽनुगताकारमुपलभ्यते तदभावे नेति वरमध्यक्षप्रत्ययावसेयानां तेषामेव तन्निमित्तता कल्पनीया । न चैतद्वक्तव्यं "पिण्डानामविशिष्टत्वात्प्रतिनियमो न स्यादनुगतप्रत्ययोत्पत्तौ" इति, यतो यथा सदादिरूपतयाविशेषेऽपि तन्तू-

1 A omits तत् 2 B omits आकार

नामेव पटजन्मनि हेतुकत्वं न कपालादीनां, तथा शाबलेयादीनामेव गौर्गौरिति ज्ञानोत्पादनसामर्थ्यं भविष्यति कयाचिद्व्यक्त्या न कर्कादीनाम् । यथा यथा गुडूच्यादेरेवं[1] ज्वरादिशमने सामर्थ्यं प्रतीयते न दध्यादेर्वस्तुरूपतयाविशेषेऽपि, तथा प्रकृतेऽपि भविष्यतीति न पर्यनुयोगो युक्तः । किं च । सामान्यं मूर्तमभ्युपगम्यते, अमूर्तं वा । यद्यमूर्तं, न सामान्यं स्यात्, रूपवत् । अथ मूर्तं; तथापि न सामान्यं, घटवत् । तथा किं सांशमभ्युपगम्यते, निरंशं वा । यद्यनंशं, न तर्हि सामान्यं, अनंशत्वात्, परमाणुवत् । अथ सांशं; तथापि न सामान्यं, घटवत् । किं च । पिण्डेभ्यो भिन्नं वा स्यात्, अभिन्नं वा, भिन्नाभिन्नं वा । न तावद्भिन्नाभिन्नं, विरोधात् । अथ "केनाप्यंशेन भिन्नं केनाप्यभिन्नं" इति; तदपि न युक्तं, सामान्यस्य निरंशत्वात् । नाप्यभिन्नं, पिण्डानां नानात्वे तस्यापि नानात्वापत्तेः, तदेकत्वे वा तेषामेकरूपताप्रसक्तेः । नापि भिन्नं, असामान्यरूपताप्रसङ्गात्, दण्डादिवत् । अथानेकसंबन्धात्सामान्यमभिधीयते; तदपि न युक्तं, संख्याकार्यद्रव्यादेरपि सामान्यरूपताप्रसङ्गात् । अथानुस्यूताकारतया प्रतीयमानं सामान्यं, नेतरदित्यभिधीयते; तदप्यसंगतं, यतः किमात्मरूपानुस्यूतं, पररूपानुस्यूतं वा[2] । न तावदात्मरूपानुस्यूतं, आत्मन्यनुगमाभावात् । अथ पररूपानुस्यूतं; तदपि न चारु, यतः पररूपानुस्यूतता किं तादात्म्यं, तत्समवायो वा । तद्यदि तादात्म्यं, तदा पूर्वो दोषः[3] । अथ तत्समवायः; सोऽपि न संगतः, समवायस्याभावात् । भवतु वा सर्वव्यापि गोत्वं; यथा गोपिण्डेषु संबन्धयति, तथा कर्कादिपिण्डेषु किं न संबन्धयति विशे-

1 A गूद्रव्यादेरेव; B गूडूच्यादेरेव 2 A omits पररूपानुस्यूतं वा
3 A पूर्वदोषः

षाभावात् । अवान्तरकल्पने चानवस्था स्यात् । किं च । सामान्यं किमनुत्पन्ने पिण्डे वर्तते, उत्पन्ने वा, उत्पद्यमाने वेति विकल्पाः । न तावदनुत्पन्ने, तदा पिण्डस्यासत्त्वात् । नाप्युत्पन्ने, अगोरूपेऽश्वपिण्ड इव तत्र तस्य वृत्त्ययोगात् । नाप्युत्पद्यमाने, अनिष्पन्नस्याधारत्वायोगात् । किं च । उत्पद्यमानेन पिण्डेन सह सामान्यं संबध्यमानं किमन्यत आगत्य संबध्यते, आहोस्वित्पिण्डोत्पत्तेः प्रागेव तद्देशावस्थानात्, उत पिण्डेन सहोत्पादात् । तत्र न तावदन्यत आगत्य संबध्यत इति पक्ष आश्रयितुं युक्तः, यतः प्राक्तनपिण्डपरित्यागेन तत्तत्रागच्छति, उतापरित्यागेनेति वाच्यम् । यदि "परित्यागेन" इति पक्षः, स न युक्तः, प्राक्तनपिण्डस्य गोत्वपरित्यक्तस्यागोरूपताप्रसक्तेः । अथापरित्यागेन, तदापरित्यक्तप्राक्तनपिण्डस्य निरंशस्य रूपादेरिवागमनासंभवः । न च "प्राक्तनाधारपरित्यागेऽप्याधारान्तरसंक्रमः सर्पादेरिव सामान्यस्य भविष्यति" इति वक्तव्यं, सामान्यस्यामूर्तत्वाभ्युपगमात्, अमूर्तस्य च रूपादिवद्गमनासंभवात् । न च सर्पवत्पूर्वाधारापरित्यागेनाधारान्तरक्रोडीकरणे सामान्यरूपता सदेशस्य घटवत्, सामान्यरूपतानुपपत्तेः । न च "पिण्डोत्पत्तेः प्राक् तत्र देशे तस्यावस्थानादुत्पद्यमाने पिण्डे वृत्तिः" इत्यभ्युपगमोऽपि युक्तः, निराधारस्य सामान्यस्य तत्रावस्थानासंभवात्, अवस्थाने वाकाशवत्सामान्यरूपताविरहात् । न च "पिण्डेनैव सह समुत्पद्यते" इति पक्षप्रकल्पनापि संगता, उत्पत्तिमत्त्वेन तस्यानित्यताप्रसक्तेः, अनित्यस्य च ज्वालादिवत्सामान्यरूपतायोगात् । न च शाबलेयादिपिण्डस्य सामान्यसंबन्धविकल्पस्यैव परेणावस्थानमभ्युपगतम् । ततः सामान्यकल्पनानेकदोषदुष्टत्वादसंगतैवेति स्थितम् ॥ सामान्यनिराकरणवादः ॥ १९ ॥

1 A omits सामान्यस्य भविष्यति" इति सदेशस्य घटवत्

[ XX ]

## [ अथापशब्दनिराकरणम् ]

येऽप्यमी शाब्दिका अपशब्दजिघृक्षवो लब्धलक्ष्याः समाचक्षीरन् "अपशब्दस्त्वया कृतः" इति, तदेतद्विचारयामः। किं ध्वनिव्यतिरिक्तोऽयमपशब्दः, आहोस्विद्ध्वनिरेवापशब्दः। यदि तावत् "ध्वनिव्यतिरिक्तोऽयमपशब्दः" इत्ययं पक्षः कक्षीक्रियते, एवं सति यावन्तोऽप्यमी ध्वनिव्यतिरिक्ता रूपादयः सर्व एव ते ध्वनिव्यतिरिक्तत्वादपशब्दतामश्नुवीरन्, आगमविरोधश्चापद्यते भवतां, यतः स्फोटोऽपि ध्वनिव्यतिरिक्त एवेष्यते, तस्यापशब्दता प्राप्नुयात् । अथ "ध्वनिरेवायमपशब्दः" इति प्रतिज्ञा; असावपि निष्कृतनासाश्रवणेव नायिका न शोभामादधाति, यतो ध्वनिः शब्द इत्यनर्थान्तरं, लौकिकप्रयोगदर्शनात् । तथाहि । ध्वनिं कुर्वन्नुच्यते शब्दं कुरु मापशब्दं कार्षीरिति तस्मादसत्कल्पनैवासौ त्वयापशब्दः कृत इति । किं च । श्रोत्रेन्द्रियज्ञानावसेयो वा भवेदपशब्दः, चक्षुर्विज्ञानसमधिगम्यो वा । तत्र यद्याद्यः पक्षः, तदा न साधिमानमास्कन्दति, श्रोत्रेन्द्रियज्ञानग्राह्यत्वात्, साधुशब्दवत् । अथ द्वितीयः कल्पः; तदापशब्दव्यपदेशतां[1] नापद्यते, चाक्षुषत्वात्, रूपादिवत् । अथैवमभिदध्युः "लक्षणानुपपन्नोऽपशब्दः;" एतदपि स्ववधाय कृत्योपस्थानं यतो यदि लक्षणाभिधानेन जेगीयमानाः शब्दास्त एवोच्यन्ते, ततः शब्दानां नित्यता प्रलीयते कथम् । यदि नित्याः शब्दाः किं लक्षणेन। अथ लक्षणं, न तर्हि नित्याः। अथैवमामानन्ति नैयायिकाः । "अर्थप्रतिपादकाः साधव इत्यपशब्देन च नासावर्थो गम्यत इत्येवमपि न दोषः। योऽपि "गौः" इत्याह सोऽपि लाङ्गूलखुरककुदविषाणादिमन्तं गोपिण्डं प्रत्याययति। योऽपि "गवि" इत्याह, सोऽपि

1 A व्यपदेशतो

तमर्थं, न च "गवि" इत्युक्ते वडवा प्रतीयते करेणुर्वा" । एतत्त्वयुक्तम् । "अर्थप्रतिपादकाः साधवः" इति समर्थं, न च "गवि" इत्युक्ते वडवा प्रतीयते" इति स्थितमेतत् "नास्त्यपशब्दः;" तदुत्पादककारणाभावात् कार्यस्याप्यभाव इति निश्चीयते । अथैवमाहुर्वैयाकरणाः । यान्येवापशब्दस्योत्पादककारणानि, तान्येव साधुशब्दस्यापि । अयमपि परिहारसंबन्धोऽसंबन्धधतामात्मनः प्रदर्शयति । किं कारणानि । यतो भिन्नानि कार्याणि भिन्नेभ्यो कारणेभ्यो दृश्यन्ते । तस्माच्छब्दापशब्दयोरेकं कारणं नोपपद्यत इति स्थितमेतत्, अन्यथा ह्येकस्माच्छालिबीजात्सर्वसस्योत्पत्तिः स्यात् । न चैतद्दृष्टमिष्टं वा । तस्मादयुक्तमुक्तं "यान्येव शब्दस्योत्पादककारणानि तान्येवापशब्दस्यापि" इति। अथ ते व्याकरणविदो वदन्ति । "योऽयमपशब्दनिराकरणोपायोपन्यासो भवद्भिरङ्गीकृतः, नानेनायमपशब्दो निराकर्तुं शक्यते । किं कारणम् । यतः शब्द एवावस्थान्तरगतोऽपशब्द इत्युच्यते यथा वत्स एवावस्थान्तरगतो वृषभादिव्यपदेशमापद्यते" । अयमप्यसारः, यतस्ते वैयाकरणा नित्याः शब्दा नित्योऽर्थो नित्यः संबन्ध इत्याचक्षते नित्येषु नाम शब्देषु कूटस्थैरविगलद्भिर्वर्णैर्भवितव्यम् । कथमवस्थान्तरप्राप्त्या शब्दोऽभिसंबध्यत इत्याह दुर्मेधसां वो[1] बोध इत्यपशब्दनिराकरणम् ॥ २० ॥

[ XXI ]

## [ अथ पचतिवादः ]

इह हि प्रथमं तावल्लक्षणे विचारयामः, तदुत्तरकालं प्रमाणे । यो हि तल्लक्षणं न वेत्ति कथं तस्य तर्काधिकारः । तत्र लक्षणमेव विचार्यते । लक्षणं चाख्यातम् । आख्यातं च क्रियाप्रधानम्[2] । क्रिया च "पचति" इत्यादिरूपा । तत्र

---

1 A omits 2 A Comit प्रधानम्

"भवता पचति" इत्यादिरूपं न शक्यते साधयितुम् । तथाहि । "डुपचष् पाके[1]" इति धातुः । तत्रानुबन्धयोः प्रयोजनं वक्तव्यम् । भवतु नाम किमपि प्रयोजनं दुर्बलं वादिनं दृष्ट्वाभ्युपगमवादः प्रवर्तते किं चान्यदपि प्रेर्यते यथा पचतेः परस्मैपदानामेकवचनं कस्मिन्नर्थे प्रवर्तते । अथेत्थमाचक्षीथाः कर्तरि ननु कर्तापि विचारणीयः सामान्यो विशिष्टो वा । तत्र विशिष्टे कर्तरि परस्मैपदं केनापि सूत्रेणाप्रतिपादितम् । सामान्येन च परस्मैपदं दृश्यते, यथा "पचति[2] देवदत्तः" । तत्रापि "पचति देवदत्तेन" इति स्यात्, कथं पचति देवदत्तः । यथा कृतपूर्वी कटं देवदत्तः पुत्रीयति माणवकमित्यत्र विशेषकर्मद्योतिका द्वितीया प्रवर्तते, तथात्रापि विशेषकर्तृद्योतिका तृतीया प्रवर्तमाना दुर्निवारा स्यात् । किं च । क्रियाभावो धातुः । क्रिया च साधनायत्ता, साधनं च प्रत्ययवाच्यम् । ततो न यावत्प्रत्ययः समुत्पन्नो न तावद्धातुत्वं न यावद्धातुत्वं समुत्पन्नं न तावत्प्रत्ययः समुत्पद्यत इतीतरेतराश्रयदूषणं समापनीपद्यते । किं च । क्रिया प्रत्यक्षेण गृह्यते, अनुमानेन वा । तत्र प्रत्यक्षं पञ्चधा स्पर्शनरसनदर्शनघ्राणश्रोत्रेभ्यः समुत्पन्नम् । तत्र न तावत्स्पर्शनेन क्रिया गृह्यते । कथमिति चेत्, तस्याः स्पर्शरूपापत्तेः, तुल्यादिवत् । न च क्रिया तुलीभवितुमर्हति । नापि रसनेन्द्रियेणोपादीयते, तस्याः स्निग्धदुग्धादिरूपापत्तेः । न च दुग्धादिरूपा क्रिया क्वापि दृश्यते । नापि घ्राणेन्द्रियेणाङ्गीक्रियते, तस्या गन्धरूपापत्तेर्मृगमदघनसारादिवत्; न च मृगमदादिरूपता युक्ता । न च चक्षुषा गृह्यते, तस्याश्चित्राङ्गनादिरूपापत्तेः; न च चित्राङ्गनादिरूपता समीचीना । न च श्रवणाभ्यामभ्युपगम्यते, तस्या वेणुवीणारवरूपतापत्तेः; न च वेणुवीणादिरवरूपा क्रिया । तदेवं सर्वेष्वपीन्द्रियादिष्वर्थेषु क्रियानुभावाभावान्न प्रत्यक्षेण

गृह्यते क्रिया । नाप्यनुमानेन । अनुमानं हि लिङ्गलिङ्गिनोरविनाभावनिश्चयेन प्रवर्तते, यथा धूमाद्यनुमानम् । न च क्रियायां धूमवल्लिङ्गमुत्पश्यामः, तस्या अमूर्तत्वात् । अतः कथं गृह्यते क्रियेति पूर्वपक्षः। अथोत्तरः । तत्र यदुक्तं "अनुबन्धयोः किं प्रयोजनं" अनुबन्धप्रयोजनममुत्र धातौ तत्तावदुच्यते डुकारो ड्वनुबन्धाद्त्रिमक्; तेन निर्वृत इति विशेषार्थः । तेन पक्त्रिममिति सिद्धम् । षकारोऽपि षानुबन्धभिदादिभ्योऽङित्यत्र विशेषप्रयोजनार्थः; तेन पचेति सिद्धम्। यदप्युक्तं "विशिष्टकर्तृत्वद्योतिका तृतीया प्राप्नोति" तदपि न युक्तं, समानाधिकरणेऽस्य न्यायस्य वैयाकरणैरनभ्युपगमात् । यथा कृतः कटो विशेषकर्मद्योतिका द्वितीया न प्रवर्तते, तथा विशेषकर्तृत्वद्योतिका तृतीया न प्राप्नोति। यदप्युक्तं "क्रियाभावो धातुः क्रिया च साधनायत्ता" इत्यादि, तदपि न युक्तमवभासते, "पचति" "धावति" इत्यादिष्वपोद्धारद्वारेण क्रियाया अङ्गीकरणात्[1] । यदप्युक्तं "पञ्चविधेन प्रत्यक्षेणानुमानेन च न गृह्यते" तदप्यनुपपन्नं, तस्या अनुमानेन ग्रहणात् । तथा चोक्तं

नित्यं क्रियानुमेया द्रव्यविकारेण भवति धात्वर्थः ।
कारकसाध्या द्वेधा सकर्मिकाकर्मिका चेति

पचतिवादः ॥ २३ ॥

---

जैनं सांख्यं तथा बौद्धमौलूक्यं च तथापरम् ।
लौकायितं च मीमांसं षडेता दृष्टयः स्मृताः ॥ १ ॥
रत्नत्रयं जिनो देवो द्वे माने तत्त्वसप्तकम् ।
नित्यानित्यं जगत्सर्वमिति जैनेन्द्रदर्शनम् ॥ २ ॥
पञ्चविंशतितत्त्वानि नित्यः सर्वगतोऽक्रियः ।
आत्मा भोगी तथामूर्तः सांख्यानां मतमीदृशम् ॥ ३ ॥

---

1 A omits from यदप्युक्तं down to अङ्गीकरणात्

क्षणिकत्वं ज्ञानवादो शून्यवादस्तथा परः ।
द्वादशायतनानीति तृतीयं बौद्धदर्शनम् ॥ ४ ॥
ईश्वरेण कृतं सर्वं षट् पदार्थाः शिवोदिताः ।
चत्वार्येव प्रमाणानि नैयायिकमतं त्वदः ॥ ५ ॥
नास्ति जीवो न वा देवो न मोक्षो न पुनर्भवः ।
न पुण्यपापे सद्भूते भूतमात्रमिदं जगत् ॥ ६ ॥
अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणोच्यते
प्रत्यक्षो न हि बाह्यवस्तुविसरः सौत्रान्तिकैराश्रितः ।
योगाचारमतानुसारिमतिना साकारबुद्धिः परं
मन्यन्ते बत मध्यमाः कृतधियः स्वच्छां परां संविदम्॥७॥
अपौरुषेयं वेदस्य प्रामाण्यं षट्प्रमाणता ।
सर्वज्ञाभाव इत्येतन्मीमांसकमतं मतम् ॥ ८ ॥
प्रत्यक्षमनुमानं च शाब्दं चोपमया सह ।
अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः ॥ ९ ॥

॥ इति श्रीचन्द्रप्रभसूरिभिर्विरचितः
प्रमेयरत्नकोशः संपूर्णः ॥

# INDEX.


| | | |
|---|---|---|
| I | सर्वज्ञसिद्धिः । ... ... ... | १ |
| II | सप्तभङ्गी । ... ... ... | ५ |
| III | उत्पादव्ययध्रौव्यात्मकं वस्तु । ... | ९ |
| IV | सप्तभङ्गीस्थापनम् । ... ... | १२ |
| V | एकान्तनित्यानित्यवादभङ्गः । ... | २० |
| VI | वादिघटमुद्गरवादः । ... ... | २४ |
| VII | सामग्रीभङ्गवादः । ... ... | ३० |
| VIII | क्षणिकवादः । ... ... ... | ३० |
| IX | वादिमीनानायः । ... ... | ३५ |
| X | शाब्दप्रमाणनिराकरणम् । ... ... | ४० |
| XI | कार्यकारणभङ्गः । ... ... | ४३ |
| XII | सर्वगतात्मवादः । ... ... | ४६ |
| XIII | सत्कार्यवादभङ्गः । ... ... | ४९ |
| XIV | ज्ञानवादः । ... ... ... | ५० |
| XV | ज्ञानक्षणिकत्ववादः । ... ... | ५३ |
| XVI | बौद्धहेतुखण्डनम् । ... ... | ५७ |
| XVII | वाच्यवाचकसंबन्धः । ... ... | ५९ |
| XVIII | वाच्यवाचकसंबन्धखण्डनम् । ... | ६४ |
| XIX | सामान्यनिराकरणम् । ... ... | ६५ |
| XX | अपशब्दनिराकरणम् । ... ... | ६९ |
| XXI | पचतिवादः । ... ... ... | ७० |

